


# सोमज्योतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रैमासिकं वार्तापत्रम्


Shree Somnath Sanskrit University

Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)

Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

खैस्ताब्दः २०२१ वैक्रमाब्दः २०७८ अङ्कः २७ जनवरी-मार्च २०२१


## कुलपतिवाक्



आत्मीया बान्धवा:,

प्रात: जागरणम्, दिवसे नानाविधं कर्म, रात्रौ शयनम् इत्येतेषु विविधेषु विक्षिप्तेषु च प्रसङ्गेषु तत्त्वमेकं किमपि निरन्तरम् अभिन्नम् एकरूपं संक्षिप्तं सारभूतम् अक्रियमपि सततं स्पन्दितं जाग्रत्-स्वप्न-सुषुप्त्याद्यवस्थासु सुतरां निरवस्थम् अवस्थितं भवति। तत् तत्त्वं किमिति जिज्ञासायाम् -

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्य: परं मन:।
मनसस्तु परा बुद्धिर्यो बुद्धे: परतस्तु स:।। (गीता ३/४१)

इत्यत्र बुद्धे: परत: स आत्मा एवेति वक्तुं शक्यते। तदेवात्र अस्माभि: "ज्योति:" इत्याख्यया आख्यातुमपि शक्यते, यत् संप्रार्थ्य "तमसो मा ज्योतिर्गमय" इति वैदिकी प्रार्थना, "ज्योतिर्मयं चन्द्रकलावतंसम्" इति भगवत: श्रीसोमनाथस्य स्तुत्यंशत्वेन तत्स्वरूपकथनं च प्रवर्तते। सर्वस्यापि अन्त:करणे तज्ज्योतिर्मयं दिव्यं चैतन्यम् आनन्दरूपम् अमृतं च विराजते, तद्यथाऽऽह भगवत्पाद आदिशङ्कराचार्य: -

"चिदानन्दरूप: शिवोऽहं शिवोऽहम्" इति निर्वाणषट्के। तदेव श्रीसोमनाथस्य मौलिकं स्वरूपम् अभिज्ञातुं तदेवाराधयितुम् आत्मन: तदाकाराकारिततां साधयितुं च "सोमज्योति:" इति श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मुखपत्रं सर्वात्मना प्रवर्तते। तत्र च तस्यायम् अङ्क: उपर्युक्ततत्त्व- समाराधनतत्पर: सन् स्वस्य सर्वविधं भौतिकं बौद्धिकं च सामग्रीनिचयं तत्समाराधनोपकरणत्वेन प्रस्तोतुं प्रवर्तत इति महानयं प्रमोदस्याऽवसर:।

मित्राणि ! श्रीमद्वासल्मीकीयरामायणे भगवती सीता श्रीहनुमत: गुणानेतान् अभिजानाति -

तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नय:।
पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यदा। (रामायणम्, युद्ध०, १२८/८२)

श्रीहनुमति महति तेजसि स्थितेऽपि पर्याप्ता धृतिरासीत्, तेन पर्याप्तं यशोऽर्जितं चेदपि कार्ये दक्षतां स न त्यक्तवान् आसीत् (सामान्यत: यशोऽवास्यनन्तरं कार्ये रुचि: क्षीयते), तस्मिन् सामर्थ्यातिशय्ये विद्यमानेऽपि तस्य विनय: स्तुत्य: आसीत् किं च स: सर्वथा नयस्य नीतेर्वा पथि सञ्चरते स्म। पूर्णत: पौरुषं तस्मिन्नासीदेव, विक्रमोऽपि तथैव श्रेष्ठतया आसीत्, किन्तु तस्य बुद्धि: सर्वथा अनुकूला भावात्मिका चासीत्, स्तूयतेऽपि स: "बुद्धिमतां वरिष्ठ:" इति।

एतेन प्रसङ्गेन वयं कीदृशीं शिक्षां प्राप्नुतम:? मन्ये, तेज:, यश:, सामर्थ्यं, पौरुषमित्यादि यत् किमपि यथेष्टम् अर्जितं भवति, तै: साकम् अनेकेषां धैर्यच्युति: अदक्षता अविनय: बुद्धिभ्रंश: इत्यादीनां विकाराणामपि उदय: सम्भाव्यते। अत: श्रीहनुमतेव अस्माभि: सर्वैरपि भौतिकबौद्धिकाद्युपलब्धिभि: सह सम्भावितान् विकारान् विजित्य आत्मसंयमिभि: आत्मानुशासनयुतै: भवितव्यम्, किं च पूर्णं जीवनं तस्य परमज्योतिष: एव समाराधनाय सर्वोत्तमं साधनमिति मत्वा तज्ज्योतिष: सर्वव्यापित्वात् सर्वेषां कल्याणचिन्तनेन तदुद्दिश्य कार्यसम्पादनेन च तस्य सम्यगाराधनं शक्यमिति तदर्थम् आत्मनियोजनं विधातव्यम्।

सर्वेषां "सोमज्योति:" इति मुखपत्रसम्पादनकर्मनिरतानां कृते किं च विश्वविद्यालयस्य छात्राध्यापक-पदाधिकारिकर्मचारिणां कृते हार्दा: शुभाशया: व्याह्रियन्ते।

(प्रो. गोपबन्धु मिश्र:)
कुलपति:

प्रधानसम्पादकः
प्रो. गोपबन्धु मिश्रः
कुलपतिः

प्रकाशकः
डॉ. दशरथ जादवः
कुलसचिवः

प्रबन्धसम्पादकः
श्री रवीन्द्र एस. काले
ग्रन्थपालः

सम्पादकाः
डॉ. नरेन्द्रकुमार एल. पण्ड्या
डॉ. ललितकुमार ए. पटेलः
डॉ. दीपेश विनोद कतिरा
डॉ. जानकीशरण आचार्यः
श्री जिगर भट्टः

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Quarterly Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

Address:
The Editor
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist Gir Somnath, Gujarat - 362 266.
(O) 02876 - 244532
E-mai: editor.somjyoti@sssu.ac.in

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि ''सोमज्योतिः'' द्रष्टुं शक्यते - www.sssu.ac.in

Statement about the ownership and other particulars about newspapers

**SOMAJYOTIḤ**

FORM IV

(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Quarterly
3. Printer's Name : Jalaram Graphics & Offset
   Nationality : Indian
   Address : Behind Hotel Kaveri, Veraval-362266
4. Publisher's Name : The Registrar
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : Prof. Gopabandhu Mishra
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

# कुलपतेः दैनन्दिनी

०१-०१-२०२१ विद्वत्परिषदः कार्यकारिण्याः उपवेशने अध्यक्षत्वेन उपस्थितिः।
श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य "शास्त्रपरिचायिका"-लोकार्पणकार्यक्रमे, "ज्योतिः" संस्थासम्बद्धज्ञानकोषस्य लोकार्पणकार्यक्रमे च अध्यक्षत्वेन उपस्थितिः।

०२-०१-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सत्तामण्डलगोष्ठ्याम् अध्यक्षत्वेन उपस्थितिः।
गोविन्दाचार्य- श्रद्धाञ्जलिकार्यक्रमे उपस्थितिः।

०३-०१-२०२१ सोमनाथ-ट्रस्टद्वारा आयोजिते विद्वच्चयनस्य पुरस्कारार्थम् उपवेशने सदस्यत्वेन उपस्थितिः।

०४-०१-२०२१ कर्णावत्यां संस्कृतभारतीगणैः सह उपवेशनम्।

०५-०१-२०२१ कर्णावत्याम् अखिलभारतीयसमन्वयगोष्ठ्याम् उपस्थितिः।

०८-०१-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ज्योतिषविषयस्य अल्पकालीन-आभासीयपाठ्यक्रमस्य उद्घाटने अध्यक्षत्वेन उपस्थितिः।

१०-०१-२०२१ कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य तथा च U S A संस्कृत-अध्ययनसमापनसत्रे मुख्यवक्तृत्वेन उपस्थितिः।

११-०१-२०२१ महामहोपाध्याय-केकाशास्त्रिव्याख्यानमालायाः सप्तमे व्याख्याने अध्यक्षत्वेन उपस्थितिः।
श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायां महिलाधिकारसमितेः गोष्ठ्याम् अध्यक्षत्वेन उपस्थितिः। वाल्मीकि-संस्कृत-विश्वविद्यालयस्य विद्वत्परिषदः गोष्ठ्यां सदस्यत्वेन उपस्थितिः।

१२-०१-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते स्वामि-विवेकानन्द-जयन्तीमुपलक्ष्य विशिष्टव्याख्याने अध्यक्षत्वेन उपस्थितिः।

१५-०१-२०२१ श्रीबाबडेश्वरसंस्कृतमहाविद्यालयस्य (पोरबन्दरम्) वार्षिकोत्सवे बौद्धिकस्पर्धायाः मुख्यातिथित्वेन उपस्थितिः।

१८-०१-२०२१ MoU with GTU Convocation, Mahatma Mandir, Gandhinagar - शिक्षामन्त्रिमहोदयेन सह उपस्थितिः।

१९-०१-२०२१ विश्वविद्यालयपक्षतः प्रचारप्रतिनिधिभिः सह वार्ता।

२०-०१-२०२१ गुजरात-विधि-विश्वविद्यालयस्य दीक्षान्तसमारोहे उपस्थितिः।
वाक्यार्थपरिषदः उद्घाटने अध्यक्षत्वेन उपस्थितिः।

२१-०१-२०२१ सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन आयोजिते पाणिनीयं भाषाविज्ञानम् - व्याख्याने मुख्यवक्तृत्वेन उपस्थितिः।

२५-०१-२०२१ जिलाधिकारिकार्यालयेन आयोजिते राष्ट्रियमतदातृदिवसकार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः।
विश्वे संस्कृतम्-दुबई आभासीयकार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः।

२६-०१-२०२१ विश्वविद्यालयपरिसरे ध्वजवन्दनकार्यक्रमे उपस्थितिः।

२७-०१-२०२१ विश्वविद्यालयपरिसरे वाग्वर्धिनीसभायाः उद्घाटने अध्यक्षत्वेन उपस्थितिः।

३०-०१-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य संशोधनसमितेः उपवेशने विश्वविद्यालये अध्यक्षत्वेन उपस्थितिः।

०६-०२-२०२१ भोगराइ-संस्कृतमहाविद्यालयेन (ओडिशा) आयोजिते व्याख्याने मुख्यवक्तृत्वेन उपस्थितिः।

०८-०२-२०२१ उत्तरप्रदेशराज्यहिन्दीसंस्थानेन आयोजिते कार्यक्रमे "संस्कृत शिक्षण की चुनौतियाँ, कठिनाइयाँ एवं निवारण" इति विषये मुख्यवक्तृत्वेन व्याख्यानप्रदानम्।

व्याकरणे शोधकार्यप्रविधिः इति विषये विश्वविद्यालयपरिसरे व्याख्यानम्।

१३/१४-०२-२०२१ संस्कृतभारती अखिलभारतीयसमीक्षायोजना इति कार्यक्रमे भाग्यनगरे अध्यक्षत्वेन उपस्थितिः।

१७-०२-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दर्शनविभागस्य शोधसंगोष्ठ्याः उद्घाटने अध्यक्षत्वेन उपस्थितिः।

१८-०२-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य युवमहोत्सवस्य उद्घाटने अध्यक्षत्वेन उपस्थितिः।

२०-०२-२०२१ गोविन्दगुरुविश्वविद्यालयः-गोधराद्वारा आयोजिते महाविद्यालयप्राध्यापकानां प्रशिक्षणकार्यक्रमे संस्कृते नवसाहित्यम् इति विषये मुख्यवक्तृत्वेन व्याख्यानप्रदानम्।

२१-०२-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते मातृभाषादिवसकार्यक्रमे अध्यक्षत्वेन उपस्थितिः।

२२-०२-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सत्तामण्डल-संगोष्ठ्याम् अध्यक्षत्वेन उपस्थितिः।

२४-०२-२०२१ ओल इण्डिया रेडियो प्रसारभारती संगोष्ठ्यां वक्तृत्वेन उपस्थितिः।

०५-०३-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पदवीदानसमारोहे अध्यक्षत्वेन उपस्थितिः।

०७-०३-२०२१ संस्कृत-अकादमी-गांधीनगर-द्वारा आयोजिते कार्यक्रमे "उपनिषदों में योग एवं स्वच्छता" इति विषये व्याख्यानप्रदानम्।

२२-०३-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शोधच्छात्राणां शोधविषयचयनसमितेः उपवेशने अध्यक्षत्वेन उपस्थितिः।

२४-०३-२०२१ श्रीके.का.शास्त्रि-व्याख्यानमालायाः अष्टमे व्याख्याने अध्यक्षत्वेन उपस्थितिः।

३१-०३-२०२१ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ज्योतिषविभागस्य शोधसंगोष्ठ्याः उद्घाटने अध्यक्षत्वेन उपस्थितिः।



# त्रयोदशः पदवीदानसमारम्भः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रयोदशः पदवीदानसमारोहः अस्मिन् वर्षे मार्चमासस्य पञ्चमे दिनाङ्के आयोजितः। अस्मिन् वर्षे कोरोना इति महामारीकारणेन अस्य समारोहस्य आयोजनम् आभासीयरीत्या अभवत्। गुजरातराज्यस्य महामहिमः राज्यपालः तथा च विश्वविद्यालयस्य कुलाधिपतिः आचार्यः देवव्रतः महोदयः अस्य समारोहस्य अध्यक्षत्वेन आभासीय-(ओनलाइन वेबेक्स)-माध्यमेन उपस्थाय स्नातकेभ्यः पदवीं प्रदातुम् अनुमतिं प्रायच्छत्। अस्मिन् पदवीदानसमारोहे मुख्यातिथिः प्रसिद्धः कथावाचकः श्रीरमेशभाई-ओझा, सारस्वतातिथिरूपेण भारतसर्वकारस्य निर्वाचनायुक्तचरः एन. गोपालस्वामी आभासीयरीत्या वेबेक्समाध्यमेन उपस्थितौ आस्ताम्। विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः, कुलसचिवः डॉ. दशरथः जादवः, कार्यकारिण्याः परिषदः तथा च शैक्षिकपरिषदः सदस्याः, विविधसङ्कायानाम् अध्यक्षाः, गुजरातराज्यस्य संस्कृतपरिषदः अध्यक्षः श्रीजयशङ्करः रावलः, अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, विश्वविद्यालय-सञ्चालितस्य महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, प्राप्तपदव्यः स्नातकाः च उपस्थिताः आसन्।

अस्य पदवीदानसमारोहस्य आरम्भः शङ्खनादपूर्वकं वैदिकेन मङ्गलाचरणेन अभवत्। आरम्भे उपस्थिताः महानुभावाः दीपप्रज्वालनम् अकुर्वन्। ततः कुलपतिवर्यः पदवीदानसमारोहस्य आरम्भं कर्तुं राज्यपालानाम् अनुमतिं प्राप्तवान्। तेषाम् अनुमत्या कार्यक्रमस्य शुभारम्भः अभवत्। अस्मिन् प्रसङ्गे माननीयः कुलपतिवर्यः प्रास्ताविकम् उद्बोधनं कृत्वा विश्वविद्यालयस्य प्रगतिप्रतिवेदनमपि कृतवान् तथा च स्नातकेभ्यः तैत्तिरीयोपनिषदः उपदेशं दत्तवान्। स्नातका अपि तदनुसारं प्रतिज्ञाम् अकुर्वन्। ततः शास्त्रि-शिक्षाशास्त्रि-आचार्य-तत्त्वाचार्य-विद्यावारिधि-कक्ष्याणां छात्राः पदकेन पदव्या च अलङ्कृताः। अस्मात् वर्षात् विशेषतया तत्तत्कक्ष्यासु उत्तीर्णाभ्यः बालिकाभ्यः अपि पदकस्य व्यवस्था कृता, येन तासामपि उत्साहवर्धनं भवेत्। कार्यक्रमस्य अध्यक्षः राज्यपालवर्यः प्रसङ्गोचितम् आध्यक्षीयम् उद्बोधनम् अकरोत्। ततः मुख्यातिथिः श्रीरमेशभाई ओझा तथा च सारस्वतातिथिः एन. गोपालस्वामी अपि स्वानुभूतेन वचनेन स्नातकान् उपदिष्टवन्तौ। अन्ते कुलसचिवः उपस्थितानां सर्वेषां धन्यवादज्ञापनम् अकरोत्। कार्यक्रमस्य सञ्चालनं पुराणविभागस्य अध्यापकः डॉ. पङ्कजकुमारः रावलः अकरोत्।

कार्यक्रमस्य अन्ते सुधर्मा-सभाभवने पदकप्राप्तानां छात्राणां कुलपतिमहोदयेन सह चर्चासत्रम् आयोजितम्। अस्मिन् चर्चासत्रे स्नातकाः स्वानुभवं प्रकटितवन्तः। अस्मिन् प्रसङ्गे माननीयः कुलपतिवर्यः कुलसचिववर्यः, अनुस्नातकविभागस्य अध्यक्षः, महाविद्यालयस्य प्राचार्यः, सङ्कायप्रमुखाः च उपस्थिताः आसन्। अस्य चर्चासत्रस्य सञ्चालनं साहित्यविभागस्य अध्यापकः श्रीजिगरभाई भट्टः अकरोत्।



पदवीदानसमारोहं प्रति आगच्छन्तः कुलपतिसमेताः विविध-सङ्कायाध्यक्षाः



दीक्षान्तप्रवचनं कुर्वन् कुलपतिः प्रो. गोपबन्धु मिश्रः महोदयः



पदवीदानसमारोहे विविधसङ्कायानाम् अध्यक्षाः



माननीयाः श्रीरमेशभाई ओझा 'भाईश्री'वर्य्याः

## अस्मिन् पदवीदानसमारोहे विविधकक्ष्यासु पदकं प्राप्तानां छात्राणां सूची -

### कक्ष्यासु क्रमप्राप्ताः छात्राः

| छात्रनाम | संस्था | कक्षा | प्रतिशतम् | मुख्यविषयः |
|---|---|---|---|---|
| पण्ड्या प्रतिक महेशभाई | दर्शनम् सं.म.वि. छारोडी | शास्त्री | ८३.९८ | साहित्यम् |
| कोरिया तेजस हरेशभाई | BAPS स्वामिनारायण सं.म.वि. | शास्त्री | ८३.०५ | स्वामिनारायणवेदान्तः |
| साधु निरंजनदास देवकृष्णदास | दर्शनम् सं.म.वि. छारोडी | आचार्यः | ९१.१० | स्वामिनारायणवेदान्तः |
| अजमेरा अक्षय अतुल | BAPS स्वामिनारायण सं.म.वि. | आचार्यः | ९०.३० | स्वामिनारायणवेदान्तः |
| जोषी तुषार कनैयालाल | श्रीभागवतविद्यापीठ शिक्षाशास्त्री म.वि. | शिक्षाशास्त्री | ९३.६१ | - |
| पुरोहित सागर नरपतभाई | श्रीभागवतविद्यापीठ शिक्षाशास्त्री म.वि. | शिक्षाशास्त्री | ९३.१० | - |
| पारेख रीटा गोविंदभाई | PGDCA केन्द्रम्, पेटलाद | PGDCA | ८१.१७ | - |
| गोस्वामी रीया जयसुखगिरि | PGDCA केन्द्रम्, मांगरेळ | PGDCA | ७८.७५ | - |
| रोहित प्रेरणा मनजीभाई | एन एस पटेल म.वि. आणंद | आचार्यः (बालिका) | ७३.०५ | वास्तुशास्त्रम् |
| शर्मा कीर्ति कैलासचन्द्र | विश्वविद्यालय सं. म.वि. वेरावलम् | शास्त्री (बालिका) | ६९.९५ | सर्वदर्शनम् |

### विषयानुसारं क्रमप्राप्ताः छात्राः

| | | | | |
|---|---|---|---|---|
| जोषी राजकुमार परेशभाई | ब्रह्मर्षि सं.म.वि. नडियाद | आचार्यः | ७७.६० | फलितज्योतिषम् |
| हरियाणी मयूर महेन्द्रभाई | स्वामिनारायण सं.म.वि. जेतलपुर | आचार्यः | ८४.८० | नव्यव्याकरणम् |
| जोषी अशोक सोमेश्वर | बाह्यच्छात्रः | आचार्यः | ७१.०६ | पुराणेतिहासः |
| देरासरी ऋषभ जितेन्द्रभाई | अनुस्नातकभवनम्, वेरावलम् | आचार्यः | ८१.२० | साहित्यम् |



पदवीदानसमारोहे भाषमाणाः श्री-एन.गोपालस्वामिवर्य्याः





पदवीदानसमारोहे माननीयाः राज्यपालमहोदयाः



विश्वविद्यालयवार्तापत्रस्य सोमज्योतिषः लोकार्पणम्



पदवीदानसमारोहे उपस्थिताः स्नातकाः

| | | | | |
|---|---|---|---|---|
| पण्ड्या मनन सुरेशभाई | वरतन्तु सं.म.वि. सोला | आचार्यः | ७२.२५ | वेदः |
| रोहित प्रेरणा मनजीभाई | एन एस पटेल म.वि. आणंद | आचार्यः | ७३.०५ | वास्तुशास्त्रम् |
| मारीया दिव्या नारणभाई | अनुस्नातक भवन, वेरावल | आचार्यः | ८४.३० | योगः |
| पण्ड्या सौरभ प्रेमप्रकाश | सीताराम सं.म.वि. अडालज | आचार्यः | ६५.०५ | धर्मशास्त्रम् |
| राज्यगुरु जयदेव धीरुभाई | दर्शनम् सं.म.वि. छारोडी | आचार्यः | ७७.५० | नव्यन्यायः |
| भट्ट जय अश्विनभाई | स्वामिनारायण सं.म.वि. जेतलपुर | आचार्यः | ६८.८५ | रामानुजवेदान्तः |
| साधु निरंजनदास देवकृष्णदास | दर्शनम् सं.म.वि. छारोडी | आचार्यः | ९१.१० | स्वामिनारायणवेदान्तः |
| अजमेरा अक्षय अतुल | BAPS स्वामिनारायण सं.म.वि. | आचार्यः | ९०.३० | स्वामिनारायणवेदान्तः |
| रावल भार्गव जगदीशचन्द्र | ब्रह्मर्षि सं.म.वि. नडियाद | शास्त्री | ७१.७४ | फलितज्योतिषम् |
| खूंट सहज घनश्यामभाई | दर्शनम् सं.म.वि. छारोडी | शास्त्री | ८१.९३ | नव्यन्यायः |
| आरम्भडीया हितेन माधवजी | बाबडेश्वर सं.म.वि. | शास्त्री | ८२.४८ | नव्यव्याकरणम् |
| हिरापरा कृष्णकुमार चन्दुभाई | रामजानकी सं.म.वि. | शास्त्री | ७६.४८ | पुराणेतिहासः |
| पण्ड्या प्रतिक महेशभाई | दर्शनम् सं.म.वि. छारोडी | शास्त्री | ८३.९८ | साहित्यम् |
| जानी अभिषेक धीरजलाल | ब्रह्मर्षि सातवलेकर सं.म.वि. किलापारडी | शास्त्री | ७७.३३ | वेदः |
| साधु हरिकृष्णदास धर्मस्वरूपदास | दर्शनम् सं.म.वि. छारोडी | शास्त्री | ७७.२९ | स्वामिनारायणवेदान्तः |
| कोरिया तेजस हरेशभाई | BAPS स्वामिनारायण सं.म.वि | शास्त्री | ८३.०५ | स्वामिनारायणवेदान्तः |
| पण्ड्या अजय रमेशभाई | वरतन्तु सं.म.वि. सोला | शास्त्री | ७०.७९ | धर्मशास्त्रम् |
| शर्मा कीर्ति कैलासचन्द्र | विश्वविद्यालय सं. म.वि. वेरावलम् | शास्त्री | ६९.९५ | सर्वदर्शनम् |




विद्यावारिधि-पदवीं प्राप्तवन्तः शोधच्छात्राः



पदवीदानसमारोहे पदकेन विभूषिताः तेजस्विनः छात्राः



## दर्शनविषयकः परिसंवादः (वेबिनार)



दर्शनपरिसंवादे कुलपतिद्वयी संयोजकद्वयी च

१७-०२-२०२१ तमे दिनाङ्के श्रीसोमनाथ-संस्कृत-युनिवर्सिटी IQAC, अनुस्नातक-विभागः तथा युनिवर्सिटी- संचालित- संस्कृत- कॉलेज इत्येतासां संस्थानां संयुक्त- तत्त्वावधाने 'सिद्धान्तानामवबोधने न्यायानाम् उपयोगिता' इति दर्शनविषयकः एकदिवसीयः वेबिनार कार्यक्रमः आयोजितः। अस्य उद्घाटनकार्यक्रमे सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य माननीयः कुलपतिमहोदयः प्रो. राजाराम शुक्लमहोदयः मुख्यवक्तृत्वेन विशिष्टातिथित्वेन समुपस्थाय सदसः मार्गदर्शनमकरोत्। उद्घाटनसत्रे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्ष्यम् ऊढवान्। सत्रारम्भे डॉ शत्रुघ्नपाणिग्राही महोदयः मान्यवराणाम् अतिथीनां स्वागतवचांसि ऊचुः। दर्शनविभागस्य प्राध्यापकः संयोजकान्यतरः डॉ जानकीशरण आचार्यमहोदयः प्रास्ताविकम् अकरोत्। सत्रेऽस्मिन् कर्नाटकविश्वविद्यालयतः शोधच्छात्रः शम्भुनाथ भट्टः, राष्ट्रिय- संस्कृत- विश्वविद्यालयतः (तिरुपतिः) डॉ. यशस्वी, श्रीसोमनाथसंस्कृत-विश्वविद्यालयतः डॉ. पङ्कजकुमारः रावलः, एते त्रयः अपि स्वीयानि शोधपत्राणि पठितवन्तः। सत्रेऽस्मिन् विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवमहोदयः अपि उपस्थितः। अथ च विश्वविद्यालयस्य तत्तद्विभागस्य अध्यक्षाः, आचार्याः, सहाचार्याः, प्राध्यापकाः, अन्तेवासिनः छात्राः अपि उपस्थिताः आसन्। प्रथमसत्रस्यान्ते पुराणविभागस्य प्राध्यापकः डॉ पङ्कजकुमारः रावलः कार्यक्रमे उपस्थितानां सर्वेषां धन्यवादार्पणमपि अकरोत्।




प्रो. देवेन्द्रनाथ- पाण्डेयमहोदयः दर्शनवेबिनारकार्यक्रमस्य द्वितीय- सत्रस्य आध्यक्ष्यम् ऊढवान्। सत्रेऽस्मिन् मुख्यशीर्षकमुपलक्ष्य बहवः विषयाः शोधच्छात्रैः समुस्थापिताः। सम्पूर्णे परिसंवादे आहत्य १८ शोधपत्राणि पठितानि। अस्य दर्शनवेबिनारकार्यक्रमस्य संयोजकौ डॉ. बी. उमा महेश्वरी, डॉ. जानकीशरणः आचार्यः च आस्ताम्। द्वितीयसत्रान्ते सर्वेषामपि धन्यवादज्ञापनं डॉ. जानकीशरण- आचार्यमहोदयेन कृतम्। अन्ते पूर्णतामन्त्रेण कार्यक्रमः पूर्णः अभवत्। सत्रद्वयस्य सञ्चालनं डॉ. बी. उमा महेश्वरी अकरोत्।

## 'ज्योतिः' इत्याख्यस्य ज्ञाननिधेः, 'शास्त्रपरिचायिका' ई-पुस्तकस्य च लोकार्पणम्

क्रैस्तवर्षस्य २०२१तमस्य प्रथमे एव दिने श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विद्वत्परिषदः गोष्ठी आयोजिता आसीत्। गोष्ठ्याम् अस्यां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहोदयाः, कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. श्रीनिवासवरखेडीमहोदयाः, गुजरातसर्वकारेण सद्यः रचितस्य संस्कृतबोर्ड इत्यस्य प्रथमे अध्यक्षाः श्रीजयशङ्कर रावल महोदयाः अन्ये च मान्याः विद्वांसः समुपस्थिताः आसन्। तेषां गरिममयोपस्थितौ तेषाम् अनुमोदनेनैव विश्वविद्यालयद्वारा 'ज्योतिः' इत्याख्यस्य अन्तर्जालीयज्ञाननिधेः लोकार्पणं विहितम्। ज्ञाननिधौ अस्मिन् विश्वे वर्तमानः यः कोऽपि शास्त्रजिज्ञासुः विश्वविद्यालयेन प्रकाशितान् ग्रन्थान् निःशुल्कं डाउनलोड कर्तुं प्रभवति। विश्वविद्यालयस्य विद्वद्भिः प्राध्यापकैः प्रणीतानि शोधपत्राणि अपि अत्र वर्तन्ते। विश्वविद्यालयस्य पाठ्यक्रमाः, प्राचीनानि प्रश्नपत्राणि, शोधज्योतिः इति शोधपत्रिकायाः भागाः, सोमज्योतिः इत्याख्यं काले काले प्रकाश्यमानं विश्वविद्यालयस्य मुखपत्रं चापि अत्र सुलभानि।

अनेन सममेव विश्वविद्यालयस्य प्राध्यापकैः शास्त्रजिज्ञासूनां कृते सरल-मानक-संस्कृतेन लिखितं 'शास्त्र-परिचायिका' इति विश्वविद्यालयस्य प्रथमम् ई-पुस्तकम् अपि लोकाय अर्पितम्। एतत् पुस्तकम् अपि विश्वविद्यालयस्य ज्ञाननिधौ निःशुल्कप्राप्तये उपारोपितं वर्तते। अस्मिन् पुस्तके वेद- व्याकरण- दर्शन- पुराणेतिहास-ज्योतिष-साहित्यानां शास्त्राणां सरलः परिचयः अध्यापकैः लिखितः अस्ति। इदं पुस्तकं नवीनच्छात्राणां कृते महते लाभाय भविष्यति। विद्वत्परिषदः सर्वेऽपि मान्याः सदस्याः विश्वविद्यालयस्य इमाम् उपलब्धिं बहुशः श्लाघितवन्तः।



शास्त्रपरिचायिकायाः ज्ञाननिधेश्च लोकार्पणम्

## समायोजिता विद्यावारिधि-प्रवेशपरीक्षा

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विद्यावारिधौ प्रवेष्टुकामानां छात्राणां कृते प्रवेशपरीक्षा आयोजिता आसीत्। प्रवेशपरीक्षायाम् उत्तीर्णवतां छात्राणां कृते जनवरीमासस्य द्वितीये दिनाङ्के विभागीयपरीक्षायाः आयोजनम् अभवत्। अस्यां परीक्षायां विषयानुगुणं छात्राः उत्तराणि विलिख्य विद्यावारिधौ प्रवेशाय आत्मनः सिद्धतां प्रदर्शितवन्तः। एतस्यां विभागीयपरीक्षायाम् उत्तीर्णेभ्यः छात्रेभ्यः एव संशोधनविषयनिर्धारण-प्रक्रियायै अनुमतिः प्रदीयते।




विद्यावारिधिप्रवेशपरीक्षायाः किञ्चन दृश्यम्

## ज्योतिषविषयक-ऑनलाईन-अल्पकालीन-पाठ्यक्रमस्य उद्घाटनकार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जनवरीमासस्य अष्टमे दिनाङ्के सायं पञ्च वादने वेबेक्समाध्यमेन ऑनलाईन-अल्पकालीन-पाठ्यक्रमस्य उद्घाटनकार्यक्रमः आयोजितः। पाठ्यक्रमस्यास्य शीर्षकः आसीत् "मुहूर्त्तं एवं च व्यावसायिकं ज्योतिषम्"।




उद्घाटने माननीयः कुलपतिवर्यः कुलसचिववर्यः च




वैदिकमङ्गलाचरणेन कार्यक्रमस्य अस्य प्रारम्भः जातः। विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः सर्वादौ उपस्थितानां मान्यवराणां परिचयपूर्वकं स्वागतमकरोत्। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन समागतः काशीहिन्दूविश्वविद्यालयस्य ज्योतिषविभागस्य पूर्वविभागाध्यक्षः माननीयः प्रो. रामजीवनः मिश्रः प्रासङ्गिकम् उद्बोधनम् अकरोत्। तत्पश्चात् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्षीयोद्बोधनमकरोत् आशीर्वचनानि च अवदत्। कार्यक्रमान्ते ज्योतिषविभागस्य सहायकाचार्यः श्रीनित्यानन्दः ओझा सर्वेषां महानुभावानां कार्तज्ञ्यज्ञापनम् अकरोत्। कार्यक्रमस्यास्य फेसबुकमाध्यमेन लाइवप्रसारणम् अपि अभवत्। उद्घाटनसत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्या सुश्री अपूर्वा अग्रवाल अकरोत्। एषः अल्पकालीनः पाठ्यक्रमः मासत्रयं यावत् प्राचलत्। अस्मिन् ५० प्रतिभागिनः सशुल्कं पञ्जीकरणं कृत्वा ज्योतिषशास्त्रस्य ज्ञानम् अलभन्त।

## विद्यावारिधेः षाण्मासिकं प्रगतिप्रतिवेदनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये विद्यावारिधौ संशोधनं कुर्वाणानां संशोधकानां कृते जनवरीमासस्य षष्ठे दिनाङ्के प्रगतिप्रतिवेदनकार्यक्रमस्य आयोजनम् अभवत्। ये संशोधकाः पञ्जीकृताः सन्ति ते विश्वविद्यालयस्य परिसरे समागत्य स्वकीयसंशोधनस्य प्रगतिं प्रस्तुतवन्तः। अस्मिन् कार्यक्रमे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, संशोधकानां मार्गदर्शकाः तथा संशोधकाः उपस्थिताः आसन्। सर्वेषां संशोधनप्रगतिं वीक्ष्य आवश्यकाः सूचनाः तथा मार्गदर्शनं महानुभावैः प्रादीयन्त। अस्य संयोजकरूपेण संशोधनाधिकारी डॉ. कार्तिकः पण्ड्या कार्यम् अकरोत्।




संशोधकानां मार्गदर्शनं कुर्वन् डॉ. नरेन्द्रकुमारः पण्ड्या




संशोधकानां मार्गदर्शनं कुर्वन् डॉ. ललितकुमारः पटेलः

## NAAC-विषये मार्गदर्शनकार्यक्रमः

विदितमेतत् यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयः राष्ट्रियमूल्याङ्कन-प्रत्यायन-परिषदः (NAAC) कृते सज्जतां करोति। अस्मिन् सन्दर्भे छात्राणां सर्वेक्षणं परिषदा क्रियते। कथं तत् परीक्षणं भवति, कथं च छात्राः परीक्षणे सर्वेक्षणे च भागं ग्रहीतुं शक्नुवन्ति इति मार्गदर्शनं कर्तुं जनवरीमासस्य अष्टमे दिनाङ्के सभागारे सामाजिकान्तरेण सहितः मार्गदर्शनकार्यक्रमः आयोजितः। अत्र डॉ. ललितकुमारः पटेलः, डॉ. नरेन्द्रकुमारः पण्ड्या, डॉ. जानकीशरणः आचार्यः, डॉ. दीपेशः कतिरा च छात्राणां मार्गदर्शनम् अकुर्वन्।



छात्राणां मार्गदर्शनं कुर्वन् डॉ. जानकीशरणः आचार्यः

## कोरोनाकाले मुखावरणवितरणं सामाजिकान्तरपालनकार्यक्रमः च



मुखावरणं वितरन् डॉ. ललितकुमारः पटेलः



कीटनाशकं हस्तप्रक्षालनद्रव्यं प्रयच्छन् छात्रः

११-०१-२०२१तमे दिनाङ्के सर्वकारस्य सूचनानुसारं विद्यार्थिनः प्रत्यक्षशिक्षणाय प्रवेशं प्राप्तवन्तः। तत्र प्राप्तप्रवेशाय प्रत्येकं विद्यार्थिने मुखावरणम् (Mask) प्रदत्तम्। तेन सह सामाजिकान्तरस्य (Social distancing) पालनाय सूचनाः तथा सर्वकारस्य दिशानिर्देशानुसारं विविधाः सूचनाः अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः प्रादात्। अस्मिन्नेव कोरोनाकाले विश्वविद्यालये प्रचलन्त्याः परीक्षायाः निरीक्षणं मा. कुलपतिमहोदयैः कृतम्। एतस्मिन् कार्यक्रमे एन.एस.एस. प्रोग्राम को-ऑर्डिनेटर डॉ. जयेश डी. मुंगरामहोदयः अपि संलग्नः आसीत्।

## राष्ट्रिय-एकता-प्रतिमायाः (SOU) मार्गदर्शकेभ्यः प्रशिक्षणकार्यक्रमः

भारतसर्वकारेण वडोदरामहानगरस्य समीपे केवडीया-नामाख्ये स्थाने लोहपुरुषस्य सरदारवल्लभभाई-पटेल-महोदयस्य स्मृतौ राष्ट्रिय-एकता-प्रतिमायाः (स्टेच्यू ओफ युनिटी) स्थापना कृता वर्तते। अस्य स्थानस्य महत् वैशिष्ट्यम् अस्ति यत् अत्रत्याः मार्गदर्शकाः विविधाभिः भाषाभिः प्रवासिजनानां मार्गदर्शनं कुर्वन्ति। सरल-मानक-संस्कृतेन अपि प्रवासिनां मार्गदर्शनं स्यात् तदर्थं संस्कृतभारत्याः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकाः छात्राः च मार्गदर्शकानां प्रशिक्षणं कर्तुं तत्र गतवन्तः। एषः प्रशिक्षणकार्यक्रमः जनवरीमासस्य २२-२३ दिनाङ्कयोः आयोजितः। अस्मिन् प्रशिक्षण-कार्यक्रमे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, अतिथ्यध्यापकः श्रीमेहुलभाई जोषी, छात्रः रविः रादडिया च प्रशिक्षकत्वेन गत्वा कार्यं कृतवन्तः। दिनद्वये सरलमानकसंस्कृतेन प्रवासिनां मार्गदर्शनं कर्तुं राष्ट्रिय-एकता-प्रतिमायाः मार्गदर्शकाः सिद्धाः। सम्प्रति तत्र संस्कृत-मार्गदर्शकस्य व्यवस्था अस्ति। अयं प्रयत्नः भारतस्य माननीय-प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिमहोदयेन "मनसः वार्ता" कार्यक्रमे उल्लेखपूर्वकं श्लाघितः।





मार्गदर्शकानां मार्गदर्शनं कुर्वन्तौ रवि रादड़िया मेहुल जोषी च

## महामहोपाध्याय-के.का.शास्त्रि-व्याख्यानमाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जनवरीमासस्य एकादशे दिनाङ्के सायंकाले श्री के. का.शास्त्रि-पाक्षिक-व्याख्यानमालायाः सप्तमं व्याख्यानम् आयोजितम्। अस्मिन् व्याख्याने मुख्यवक्तृरूपेण सौभाग्येन प्राप्तः “पद्मश्रीः”प्रो. राजेन्द्रमिश्रः “अभिराजः”। एषः मान्यवरः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य कुलपतिचरः वर्तते। अस्य कार्यक्रमस्य अध्यक्षः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः आसीत्।




के.का.शास्त्रि-पाक्षिकव्याख्यानमालायाः सप्तमे व्याख्याने मुख्यः वक्ता पद्मश्रीः राजेन्द्रमिश्रवर्यः माननीयः कुलपतिवर्यः च

कार्यक्रमस्य आरम्भे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः महानुभावानां परिचयपूर्वकं शाब्दिकं स्वागतम् अकरोत्। ततः श्रीके. का. शास्त्रि-पाक्षिक-व्याख्यानमालायाः सप्तमस्य व्याख्यानस्य मुख्यवक्ता प्रो. राजेन्द्रमिश्रः “भारतीय संस्कृति की वैश्विकता” इति विषयमादाय विद्वत्तापूर्णं व्याख्यानम् अकरोत्। मुख्यवक्तुः व्याख्यानानन्तरम् अध्यक्षः प्रो.गोपबन्धुमिश्रमहोदयः आध्यक्षीयम् उद्बोधनम् अकरोत्। कार्यक्रमस्य अन्ते प्रो. देवेन्द्रनाथ-पाण्डेयः कार्यक्रमे उपस्थितानां महानुभावानां धन्यवादज्ञापनम् अकरोत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः, महाविद्यालयस्य प्राचार्यः, सर्वेऽपि अध्यापकाः छात्राः च वेबेक्स माध्यमेन उपस्थिताः आसन्। फेसबुक लाइवमाध्यमेन अनेके श्रोतारः अनेन व्याख्यानेन लाभान्विताः अभवन्। अस्य व्याख्यानसत्रस्य सञ्चालनं वेदवेदाङ्गसङ्कायस्य अध्यक्षः डॉ. शत्रुघ्नः पाणिग्राही अकरोत्।



अष्टमे व्याख्याने मुख्यः वक्ता प्रो. भागीरथी नन्दः

मार्चमासस्य २४ तमे दिनाङ्के अस्याः व्याख्यानमालायाः अष्टमं व्याख्यानम् आयोजितम्। अस्मिन् व्याख्यानसत्रे आदौ डॉ. जानकीशरणः आचार्यः महानुभावानां परिचयपूर्वकं स्वागतम् अकरोत्। ततश्च मुख्यवक्ता लालबहादुरशास्त्रि-केन्द्रिय-संस्कृत-विश्वविद्यालयस्य प्राध्यापकः प्रो. भागीरथी नन्दः “कालिदास साहित्य में अखण्ड भारत की परिकल्पना” इति विषयमादाय रसप्रदं व्याख्यानम् अकरोत्। अस्मिन् अष्टमे व्याख्यानसत्रे माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्षीयम् उद्बोधनम् अकरोत्। अष्टमस्य व्याख्यानसत्रस्य सञ्चालनं डॉ. पङ्कजकुमारः रावलः अकरोत्। एतस्मिन् व्याख्याने अपि सर्वेऽपि अध्यापकाः छात्राः च उपस्थिताः आसन्। इदञ्च व्याख्यानं फेसबुक माध्यमेन प्रसारितम्।

## स्वामिविवेकानन्दजयन्तीमुपलक्ष्य आयोजितं विशिष्टव्याख्यानम्


श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जनवरीमासस्य द्वादशे दिनाङ्के सायङ्काले चतुर्वादनतः वेबैक्समाध्यमेन स्वामिविवेकानन्दजयन्तीमुपलक्ष्य विशिष्टव्याख्यानमायोजितम्। अस्य कार्य्यक्रमस्य आध्यक्ष्यं समलङ्कृतवान् विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः। कार्य्यक्रमेऽस्मिन् विशिष्टव्याख्याता आसीत् परमपूज्यः कृतार्थानन्दस्वामिमहोदयः, रामकृष्णमिशन, कलकत्ता। कार्य्यक्रमस्य शुभारम्भः श्रीभाविनपण्ड्यामहोदयेन मङ्गलाचरणेन कृतः। अनन्तरमुपस्थितानां विशिष्टानाञ्च परिचयपूर्वकं स्वागतं वचसा अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारपटेलवर्यः अकरोत्। ततः स्वामिविवेकानन्दजयन्तीमुपलक्ष्य आयोजितायाः निबन्धस्पर्धायाः पुरस्कारघोषणा साहित्यविभागस्य प्रो.अर्चनाकुमारीदुबेवर्यया कृता। पुरस्कारस्योद्घोषणायाः अनन्तरं परमपूज्यस्य कृतार्थानन्दस्वामिनः वैदुष्यपूर्णं व्याख्यानं जातम्। ततः विश्वविद्यालयस्य माननीयेन कुलपतिवर्येण प्रो. गोपबन्धुमिश्रमहोदयेन आध्यक्षीयोद्बोधनं विहितम्। अन्ते चोपस्थितानां सर्वेषां कार्त्तज्ञ्यं प्रो. अर्चनाकुमारीदुबेवर्य्या प्रकटितवती। पूर्णतामन्त्रेण कार्य्यक्रमस्य समापनमभूत्। अस्य कार्य्यक्रमस्य सञ्चालनं विद्यावारिधिच्छात्रेण श्रीदिलीपत्रिवेदिमहोदयेन अकारि। अस्मिन् कार्य्यक्रमे विश्वविद्यालयस्य सर्वे अपि आचार्याः, सहाचार्याः, सहायकाचार्याः छात्राश्चोपस्थिताः आसन्। अस्य लाईवप्रसारणमपि फेसबुकद्वारा जातम्।



व्याख्याने भाषमाणः कृतार्थानन्दस्वामिवर्यः

## मानितप्रतिनिधीनां प्रथमम् उपवेशनम्

श्रीसोमनाथसंस्कृविश्वविद्यालयेन जनपदशः मानितप्रतिनिधयः नियुक्ताः सन्ति। तेषां प्रथमम् उपवेशनम् जनवरीमासस्य १९ तमे दिनाङ्के वेबेक्स माध्यमेन आयोजितम्। अस्य उपवेशनस्य आरम्भे पुराणविभागस्य अतिथ्यध्यापकः श्रीमेहुलः जोशी मङ्गलाचरणम् अकरोत्। ततश्च अनुस्नातकविभागस्य अध्यक्षेण डॉ. ललितकुमार-पटेल-महोदयेन महानुभावानां मानितप्रतिनिधीनां च स्वागतम् अक्रियत। अस्मिन् चर्चासत्रे मानितप्रतिनिधिः श्रीधरः व्यासः तथा मनोजभाई उपाध्यायः विश्वविद्यालयस्य प्रचाराय प्रसाराय च विचारान् प्रकटितवन्तौ। ततः कुलसचिवः डॉ. दशरथः जादवः मानितप्रतिनिधिभ्यः अभिनन्दनानि अवोचत्। ततः माननीयः कुलपतिवर्यः प्रो. गोपबन्धुः मिश्रः मार्गदर्शनं कुर्वाणः अब्रवीत् - "एतस्य विश्वविद्यालयस्य लक्ष्यं श्रेष्ठमानवानां निर्माणम् अस्ति। अस्मिन् विश्वविद्यालये अध्ययनं गौरवपूर्णः विषयः वर्तते। सर्वैः अध्यापकैः मानितप्रतिनिधिभिः च प्रयत्नः करणीयः, येन सर्वेऽपि अस्य विश्वविद्यालयस्य मार्गदर्शनं प्राप्नुयुः।" ततः महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्यामहोदयः उपस्थितानां धन्यवादज्ञापनम् अकरोत्। अस्य कार्यक्रमस्य सञ्चालनं साहित्यविभागस्य अध्यापकः श्रीजिगरभाई भट्टः अकरोत्। अस्मिन् चर्चासत्रे विश्वविद्यालयस्य सर्वेऽपि अध्यापकाः उपस्थिताः आसन्।




मानितप्रतिनिधीनाम् उपवेशने भाषमाणाः महानुभावाः




वाक्यार्थपरिषदि आध्यक्ष्यं कुर्वाणा प्रो. अर्चनाकुमारी दूबे





वाक्यार्थपरिषदि उपस्थिताः अध्यापकाः छात्राः च

## वाक्यार्थपरिषद्


श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायाः वाक्यार्थपरिषदः षष्ठाधिवेनं जनवरीमासस्य २०तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डेऽभूत्। अस्याः सभायाः अध्यक्षा आसीत् साहित्यविभागस्य आचार्य्या प्रो. अर्चनाकुमारीदुबे। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमा वक्त्री आसीत् योगविभागस्य प्राध्यापिका दृष्टिः बारैया। एतया 'आसनविचारः' इत्यमुं विषयमादाय आसनानां वैशिष्ट्यम्, तेषां प्रकाराः, एतैः रोगाणां निवारणञ्च कथमिति सम्यग्बोधितम्। अनन्तरं द्वितीयशोधपत्रप्रस्तोता आसीत्शारीरिकशिक्षणविभागस्य सहायकाचार्य्यः डॉ. जयेशमुङ्गरामहोदयः, अनेन 'रोगनुं मेगासिटी એટલે ઓબેસિટી' इति विषयमादाय शरीरस्थौल्येन के के रोगाः जायन्ते, तन्निदानञ्च उद्बोधितम्। ततः अन्तिमशोधपत्रमासीत् सभाध्यक्षायाः प्रो. अर्चनाकुमारीदुबेवर्य्यायाः। जीवनप्रबन्धाय उपयोगिनः गुणाः के?, ते चैकस्मिन् भगवति हनुमति रामायणादिषु कस्मिन् प्रसङ्गे द्रष्टुं शक्नुमः इत्युपदिश्य 'जीवनप्रबन्धनस्य मूर्त्तिमान् हनुमान्' इति विषयं सुष्ठु प्रतिपादितवती। अन्ते च सभाध्यक्षा अध्यक्षीयोद्बोधने द्वयोरपि शोधपत्रयोः वैशिष्ट्यमवोचत्। अधिवेशनेऽस्मिन् विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः, वरिष्ठाचार्यः प्रो. देवेन्द्रनाथपाण्डेयः, सर्वेऽपि आचार्य्याः, सहाचार्य्याः, सहायकाचार्य्याः, छात्राश्च उपस्थिताः आसन्। एषा सभा ऑनलाईनवेबैक्समाध्यमेनापि छात्राणां कृते आयोजिता आसीत्। अस्याः सञ्चालनं ज्योतिषविभागस्य सहायिकाचार्य्या सुश्रीअपूर्वा अग्रवाल अकरोत्।

## पराक्रमदिवसस्य वृत्तम्




व्याख्याने मुख्यः वक्ता डॉ. पङ्कजकुमारः रावलः, आयोजकः डॉ. जयेशः मुंगरा च


२३.१.२०२१ तमे दिनाङ्के शनिवासरे श्रीसोमनाथसंस्कृतविश्वविद्यालये पराक्रमदिवसस्यायोजनं जातम्। भारतसर्वकारस्य निर्देशालोके श्रीसुभाषचन्द्र-बोझमहोदयानां १२५ तमा जन्मजयन्ती समनुष्ठिता। कार्यक्रमऽस्मिन् वेबेक्समाध्यमेन राष्ट्रिय-सेवा-योजनाद्वारा एकस्य व्याख्यानस्यायोजनं जातम्। अत्र मुख्यवक्तृरूपेण डो. पङ्कजकुमार एस्. रावलः श्रीसुभाषचन्द्र-बोसमहोदयानां पराक्रमगाथां पराक्रमस्य महिमानं च वर्णितवान्। "भवन्तो मह्यं रक्तं यच्छन्त्वहं वः स्वातन्त्र्यं प्रदास्ये" इति तेषां मन्त्रवाक्येन ते महानुभावाः अस्माभिः स्मृताः। अत्र नैके छात्राः संलग्नाः सञ्जाताः। कार्यक्रमस्योपसंहारे डो. जयेशकुमार मुंगरा महोदयः श्रीसुभाषचन्द्र-बोसमहोदयानां जीवनविषये विशेषतया निवेदितवान्। मान्यानां कुलपतिवर्याणा प्रो. गोपबन्धुमिश्रवर्य्याणां, मान्यानां कुलसचिववर्याणां डॉ. दशरथ जादव वर्य्याणां, प्राचार्यचरणानां डॉ. नरेन्द्रकुमार पण्ड्या वर्य्याणां तथा च अनुस्नातकभवनाध्यक्षाणां डॉ. ललितकुमार पटेल महोदयानां स्मरणेन आभारविधिना पूर्णतामन्त्रेण च कार्यक्रमोऽयं पूर्णतां सम्प्राप्तः।



पराक्रमदिवसस्य व्याख्याने उपस्थिताः छात्राः

## राष्ट्रिय-मतदातृदिवसमुपलक्ष्य आयोजितं विशिष्टं व्याख्यानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन राष्ट्रियमतदातृदिवसमुपलक्ष्य प्रतिज्ञाकार्यक्रमः तथा विशिष्टं व्याख्यानम् आयोज्यत। अस्मिन् कार्यक्रमे मध्याह्ने डॉ. जयेशकुमारः मुंगरा सर्वेभ्यः अध्यापकेभ्यः छात्रेभ्यः च प्रतिज्ञाम् अग्राहयत्। सायंकाले "मतदातृदिवसः मूलभूताधिकाराः च" इति विशिष्टं व्याख्यानम् आयोजितम्। कार्यक्रमस्य आरम्भे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः स्वागतप्रवचनम् अकरोत्। अस्य व्याख्यानस्य मुख्यः वक्ता वरिष्ठः अधिवक्ता श्रीकिशोरभाई-कोटकमहोदयः आसीत्। तेन संविधानानुसारं मूलभूताधिकाराणां विषये महत्त्वपूर्णं व्याख्यानं प्रदत्तम्। तदनन्तरं कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः उद्बोधनम् अकरोत्। अन्ते डॉ. पङ्कजकुमारः रावलः धन्यवादज्ञापनम् अकरोत्। कार्यक्रमस्य संयोजकः सञ्चालकः च डॉ. मोकरीया महोदयः आसीत्। अस्य व्याख्यानस्य आयोजनम् ओनलाईन वेबेक्स माध्यमेन कृतम्। अत्र विश्वविद्यालयस्य कुलसचिवः, सर्वेऽपि अध्यापकाः छात्राः च उपस्थिताः आसन्। इदं व्याख्यानं फेसबूक माध्यमेन लाईव प्रसारणं जातम् आसीत्।




मतदातृदिवसमुपलक्ष्य आयोजिते विशिष्टव्याख्याने मुख्यः वक्ता श्रीकिशोरभाई कोटकः, माननीयः कुलपतिः अध्यापकाः च



मतदातृदिवसमुपलक्ष्य प्रतिज्ञाकार्यक्रमे अध्यापकाः छात्राः च




मतदातृदिवसमुपलक्ष्य प्रतिज्ञाकार्यक्रमे अध्यापकाः छात्राः च

## गणतन्त्रदिवसः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षमिव अस्मिन् वर्षेऽपि राष्ट्रियः उत्सवः गणतन्त्रदिवसः सोत्साहम् आचरितः। माननीयः कुलपतिवर्यः प्रो. गोपबन्धुः मिश्रः ध्वजोत्तोलनम् अकरोत्, ततश्च सर्वैः अध्यापकैः कर्मचारिभिः छात्रैश्च ध्वजवन्दनं विहितम्। अस्मिन् प्रसङ्गे छात्रैः सांस्कृतिककार्यक्रमः अपि आयोजितः, यस्मिन् तैरेव देशभक्तिगीतं, नृत्यं, वंशीवादनं, देशभक्तिभाषणं च प्रस्तुतम्। अस्मिन् अवसरे साहित्यविभागस्य अध्यापकः श्रीजिगरभाई भट्टः स्वरचितस्य भारताष्टक-काव्यस्य प्रस्तुतिमपि अकरोत्। सांस्कृतिककार्यक्रमस्य सञ्चालनं श्रीजिगरभाई भट्टः अकरोत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः, सर्वेऽपि अध्यापकाः कर्मचारिणः छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य अन्ते सर्वेषां कृते अल्पाहारस्य व्यवस्था कृता आसीत्। समग्रकार्यक्रमस्य संयोजनं डॉ. जयेशकुमारः मुंगरा अकरोत्।



गणतन्त्रदिवसे ध्वजवन्दनकार्यक्रमः



गणतन्त्रदिवसे ध्वजवन्दनकार्यक्रमे माननीयः कुलपतिवर्यः, कुलसचिवः, अध्यापकाः कर्मचारिणः च

## भाषाशिक्षणवर्गस्य उद्घाटनम्

०१.०२.२०२१ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये अनुस्नातकविभागे आचार्य-प्रथमवर्षस्य छात्राणां कृते भाषाशिक्षणस्य आरम्भः कृतः। एतस्य भाषाशिक्षणस्य कक्षाप्रातः १० वादनतः १०.४५ वादनं यावत् प्रचलति। अस्य भाषाशिक्षणवर्गस्य उद्घाटनं शैक्षणिकभवनस्य सेवकभ्रातृभिः दीपप्रज्वालनेन कृतम्। प्रत्येकं सोमवासरे मङ्गलवासरे बुधवासरे च डॉ. ललितकुमारः पटेलः तथा गुरुवासरे शुक्रवासरे शनिवासरे च श्रीजिगरभाई भट्टः छात्रेभ्यः भाषायाः प्राथमिकं शिक्षणं प्रयच्छति।



भाषाशिक्षणवर्गस्य उद्घाटने दीपप्रज्वालनं कुर्वाणाः अध्यक्षवर्याः डॉ. ललितकुमार पटेलवर्य्याः, सेवकभ्रातरः छात्राः च

## वाग्वर्धिनीपरिषदः उद्घाटनसत्रम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये ऐषमः छात्राणां वाक्कौशलवर्धनाय वाग्वर्धिनीपरिषदः उद्घाटनसत्रं २७.०१.२०२१ तमे दिनाङ्के प्रावर्तत। अस्य उद्घाटनसत्रस्य अध्यक्षः आसीत् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः। प्रभासज्योतिः इति शैक्षणिकभवनस्य सभागारे समायोजिते अस्मिन् उद्घाटनकार्यक्रमे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः, प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, वाग्वर्धिनीपरिषदः अध्यक्षः प्रो. विनोदकुमारः झा, सर्वेऽपि प्राध्यापकाः छात्राश्च उपस्थिताः आसन्। अस्य उद्घाटनसत्रस्य प्रसारणं वेबेक्समाध्यमेन अपि अभूत् यत्र छात्राः संलग्नाः आसन्।

कार्यक्रमस्य आरम्भः दीपप्राकट्येन अभूत् यत्र वेदवेदाङ्गसङ्कायाध्यक्षः डॉ. शत्रुघ्नपाणिग्राही वैदिकं मङ्गलाचरणम् अकरोत्। तदनु अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः मञ्चस्थमहानुभावानां परिचयपुरस्सरं शाब्दिकं स्वागतम् अकरोत्। अस्याः वाग्वर्धिन्याः परिषदः प्रास्ताविकं नैकोदाहरणपूर्वकं प्रो. विनोदकुमारः झा प्रास्तौत्। अस्मिन् अवसरे विश्वविद्यालयेन छात्रान् उद्दिश्य क्रियमाणकार्यविषये कुलसचिवः डॉ. दशरथ जादवः स्वकीये उद्बोधने अवादीत्। उद्घाटनसत्रस्य अध्यक्षेण मान्यकुलपतिना प्रो. गोपबन्धुमिश्रवर्येण स्वीयाध्यक्ष्ये उद्बोधने अवादि यत् वाचः संवर्धनाय परिषदः आवश्यकता अस्ति। छात्रेषु वाग्वर्धनाय इयं परिषत् भूयिष्ठा वर्तते। अस्याः परिषदः लक्ष्यं संस्कृतम् अस्ति, साधनमपि संस्कृतम् अस्तीति। कार्यक्रमान्ते प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या स्ववाग्विलासवचोभिः मधुरया रीत्या धन्यताविष्कृतिं प्राकटयत्। अस्य उद्घाटनकार्यक्रमस्य संयोजनं सत्रसञ्चालनं च वाग्वर्धिनीपरिषदः सभ्यसचिवः दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्।



वाग्वर्धिनीपरिषदः उद्घाटनसत्रे दीपप्रज्वालनम्



वाग्वर्धिनीपरिषदः उद्घाटनसत्रे उपस्थिताः अध्यापकाः छात्राः च




उद्घाटनसत्रे आध्यक्ष्यं भाषमाणः माननीयः कुलपतिवर्यः

## फिट्-इण्डिया-प्रकल्पान्तर्गते समायोजितः कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये मार्चमासस्य अष्टमे दिनाङ्के फिट्-इण्डिया-प्रकल्पान्तर्गतः कश्चन कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे डॉ. जयेशकुमारः मुंगरा महिलानां कृते आत्मरक्षणाय विविधान् व्यायामान्, प्राणायामनियमान् तथा च योगासनानि शिक्षितवान्। महिलानां रोगाणां विषये अपि मुंगरा महोदयेन व्याख्यानं प्रदत्तं तथा च तेभ्यः रोगेभ्यः रक्षणार्थम् उपायाः अपि सूचिताः। अनेन कार्य्यक्रमेण छात्रेषु आत्मरक्षणाय भावना जागृता तथा च विभिन्नशारीरिकव्यायामेन कथं स्वास्थ्यं सम्पादनीयमिति विषयेऽपि जागरूकता सञ्जाता।



महिलानां रोगाणाम् उपचाराय मार्गदर्शनं कुर्वन् डॉ. जयेशः मुंगरा



व्यायामान् कुर्वत्य बालिकाः

# आभासीयः युवमहोत्सवः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षं युवमहोत्सवः आयोज्यते। अस्मिन् वर्षे कोरोनाकारणेन ओनलाइन-युवमहोत्सवः फरवरी मासस्य १८-१९ दिनाङ्कयोः समायोजितः। अस्य युवमहोत्सवस्य उद्घाटनसत्रस्य आरम्भः १८ दिनांके प्रातः १० वादने अभवत्। उद्घाटनसत्रे अध्यक्षरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, मुख्यातिथिरूपेण च कलिङ्गविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. हरेकृष्णः शतपथी उपस्थितः आसीत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः डॉ. दशरथ-जादवः, अनुस्नातकविभागस्य कार्यकारी अध्यक्षः डॉ. शत्रुघ्नः पाणिग्राही, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, विविधसङ्कायानाम् अध्यक्षाः अध्यापकाः कर्मचारिणः चापि अस्मिन् सत्रे उपस्थिताः आसन्।

कार्यक्रमस्य आरम्भे विश्वविद्यालयस्य छात्रः दवे नीलः मङ्गलाचरणम् अकरोत्। ततः अनुस्नातक-विभागस्य कार्यकारी अध्यक्षः डॉ. शत्रुघ्न-पाणिग्राही महानुभावानां शाब्दिकं स्वागतम् अकरोत्। डॉ. जयेश मुंगरा युवमहोत्सवस्य प्रास्ताविकं प्रास्तोत्। ततः मुख्यातिथिः प्रो. हरेकृष्णः शतपथी युवमहोत्सवस्य आयोजनं श्लाघित्वा अस्य सफलतायै अकामयत। श्रीसोमनाथसंस्कृतविश्वविद्यालयः ओनलाइन-युव-महोत्सवम् आयोजितवान् अतः भूयान् श्लाघ्यः प्रयत्नः इत्युदीर्य आयोजकेभ्यः शुभकामनाः प्रादात्।

कार्यक्रमस्य अध्यक्षः प्रो. गोपबन्धुमिश्रः मार्गदर्शकं प्रेरकं च उद्बोधनम् अकरोत्। कार्यक्रमान्ते व्याकरणविभागस्य अध्यापिका सुश्री विदुषी बोल्ला धन्यवादज्ञापनमकरोत्। सम्पूर्णसत्रस्य सञ्चालनं साहित्यविभागस्य अध्यापकः श्रीजिगरभट्टः अकरोत्। अस्मिन् युवमहोत्सवे चतस्रः स्पर्धाः आयोजिताः आसन्, वादविवादः, आशुभाषणम्, एककसंस्कृतगीतम्, सुभाषितकण्ठपाठः च। एतासु स्पर्धासु १८ महाविद्यालयानां ८७ छात्राः भागम् अगृह्णन्। एतस्य युवमहोत्सवस्य समापनसत्रम् १९ दिनाङ्के सायंकाले ४:३० वादने आयोजितम्। अस्मिन् सत्रे स्पर्धासु विजेतृणाम् उद्घोषणा कृता। प्रत्येकं स्पर्धासु विजेतारः इत्थं सन्ति -

**आशुभाषणम्**

| | | |
|---|---|---|
| तरुणः ढोला | BAPS स्वा. सं.म.वि. सारङ्गपुर | प्रथमः |
| जयः दीपकभाई पुरोहितः | श्रीनारायण सं.म.वि. पेटलाद | द्वितीयः |
| दर्शनः दिनेशभाई रावलः | सो. भा. शिक्षाशास्त्री म.वि. सोला | तृतीयः |
| भक्तिः वासुदेवभाई पुरोहितः | स्वामिनारायण सं.म.वि. जेतलपुर | तृतीया |

**सुभाषितकण्ठपाठः**

| | | |
|---|---|---|
| निखिलः अरविन्दभाई ठाकरः | ब्रह्मर्षि सं.म.वि. नडियाद | प्रथमः |
| नीलः जगदीशभाई दवे | श्रीसोमनाथ सं.म.वि. वेरावल | द्वितीयः |
| रक्षकः विनयकुमार पण्ड्या | स्वामिनारायण सं.म.वि. डभाण | तृतीयः |

**एककसंस्कृतगीतम्**


| | | |
|---|---|---|
| जयदेवः जिज्ञेशभाई जोषी | श्री वरतन्तु सं.म.वि. सोला | प्रथमः |
| नीलः जगदीशभाई दवे | श्रीसोमनाथ सं.म.वि. वेरावल | द्वितीयः |
| मानवः विपुलभाई व्यासः | सो. भा. शिक्षाशास्त्री म.वि. सोला | तृतीयः |

**वादविवादः (पक्षः)**

| | | |
|---|---|---|
| कुलदीपः नवीनचन्द्रः उपाध्यायः | दर्शनम् सं.म.वि. छारोडी | प्रथमः |
| आदित्यः हसमुखभाई उपाध्यायः | ब्रह्मर्षि सं.म.वि. नडियाद | द्वितीयः |
| निकुञ्जः भानुशंकरः दवे | श्रीसोमनाथ सं.म.वि. वेरावल | द्वितीयः |
| हिमांशुः जितेन्द्रभाई जोषी | श्री वरतन्तु सं.म.वि. सोला | तृतीयः |

**वादविवादः (विपक्षः)**

| | | |
|---|---|---|
| रविः मनसुखभाई रादडिया | श्री सोमनाथ सं.वि.वि. वेरावल | प्रथमः |
| ध्रुवः पटेलः | BAPS स्वा. सं.म.वि. सारङ्गपुर | द्वितीयः |
| हितेषः कनैयालालः ठाकुरः | श्री वरतन्तु सं.म.वि. सोला | तृतीयः |



युवमहोत्सवे माननीयः कुलपतिवर्यः, निर्णायकः, संयोजकः च



युवमहोत्सवे प्रतिभागिनः

समापनसत्रे कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. श्रीनिवासः वरखेडी महोदयः मुख्यातिथित्वेन उद्बोधनम् अकरोत्। समापनसत्रे अध्यक्षत्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः उपस्थाय संयोजकेभ्यः विजेतृभ्यः च शुभाशीर्वचनानि प्रायच्छत्। समापनसत्रे कुलसचिवः डॉ. दशरथ-जादवः, प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, अनुस्नातकविभागाध्यक्षः, सर्वेऽपि अध्यापकाः छात्राश्च उपस्थिताः आसन्।

सम्पूर्णस्यास्य युवमहोत्सवस्य मार्गदर्शकः कुलसचिवः डॉ. दशरथजादवः, आयोजकत्वेन अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारपटेलः तथा महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, संयोजकत्वेन डॉ. जयेशः मुंगरा, डॉ. कार्तिकः पण्ड्या, श्रीरवीन्द्रकाले, श्रीजिगरभट्टः च आसीत्। स्पर्धासंयोजनमपि अध्यापकैः एव अक्रियत। एवम् अस्मिन् कोरोनाकालेऽपि परम्परानुसारं युवमहोत्सवः विश्वविद्यालयेन आचरितः।







मातृभाषादिवसमुपलक्ष्य विशिष्टं व्याख्यानम्



मातृभाषादिवसमुपलक्ष्य विशिष्टव्याख्यानस्य लाइव प्रसारणम्

## मातृभाषादिवसमुपलक्ष्य विशिष्टं व्याख्यानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २१/०२/२०२१ तमे दिनाङ्के रविवासरे प्रातः एकादशवादनतः वेबैक्समाध्यमेन मातृभाषादिवसमुपलक्ष्य विशिष्टव्याख्यानमनुष्ठितम्। अस्य व्याख्यानस्य अध्यक्षः विश्वविद्यालयस्य माननीयः कुलपतिः प्रो.गोपबन्धुः मिश्रः आसीत्। कार्य्यक्रमेऽस्मिन् विशिष्टव्याख्यातृत्वेन गुजरातसाहित्याकादम्याः अध्यक्षचरः पद्मश्रीः डॉ. विष्णुपण्ड्यावर्यः उपस्थितः आसीत्। विशिष्टव्याख्यानस्य शुभारम्भाद् अनन्तरमुपस्थितानां समेषाञ्च परिचयपूर्वकं वचोभिः स्वागतं साहित्यविभागस्य आचार्यः प्रो. महेन्द्रकुमारः दवे अकरोत्। ततः 'मातृभाषा गुजराती और आधारभूत अनुबन्ध संस्कृतभाषा' इति विषयमाश्रित्य भाषाविदः डॉ. विष्णुपण्ड्यावर्य्यस्य वैदुष्यपूर्णं व्याख्यानमभवत्। तदनु विश्वविद्यालयस्य कुलपतिवर्यः प्रो.गोपबन्धुः मिश्रः आध्यक्षीयोद्बोधने मातृभाषायाः स्वरूपं विमृश्य मातृवत्कथं व्यवहरति भाषेति लौकिकदृष्टान्तैः सह प्रतिपाद्य आधारभूता मातृभाषा सर्वैः सदा समादरणीयेति प्रसङ्गानुगुणं मार्गदर्शनमकरोत्। अन्ते चोपस्थितान् सर्वान् प्रति कार्त्तज्ञ्यज्ञापनम् अनुस्नातकविभागाध्यक्षः (कार्यकारी) डॉ. शत्रुघ्नः पाणिग्राही अकरोत्। पूर्णतामन्त्रेण कार्य्यक्रमस्य समापनमभूत्। अस्मिन् कार्य्यक्रमे विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथः जादवः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, सर्वेऽपि आचार्याः, सहाचार्याः, सहायकाचार्याश्च वेबैक्समाध्यमेन संलग्नाः आसन्। अस्य कार्य्यक्रमस्य प्रसारणं फेसबुकमध्येऽपि जातम्। कार्यक्रमम् एनं व्याकरणविभागस्य सहायिकाचार्या सुश्रीविदुषी बोल्ला समचालयत्।



पदयात्रायां संलग्नाः छात्राः मुंगरामहोदयः च

## स्वतन्त्रतायाः अमृतमहोत्सवः

गुजरातराज्यस्य शिक्षणविभागस्य सूचनानुसारम् १२/०३/२०२१ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन स्वतन्त्रतायाः अमृतमहोत्सवः इति कार्यक्रमः आचरितः। अस्य कार्यक्रमस्य अङ्गतया राष्ट्रिय-सेवा-योजनायाः सहयोगेन पदयात्रायाः आयोजनम् अभवत्। तदनन्तरं छात्राणां कृते निबन्धलेखनस्पर्धायाः आयोजनम् अभवत्। स्पर्धायाम् २५ छात्राः भागम् अगृह्णन्। सम्पूर्णस्य कार्यक्रमस्य संयोजनं डॉ. जयेशकुमारः



निबन्धलेखनस्पर्धा

## सम्पन्ना विद्यावारिधिकार्यशाला (Ph.D. Course Work)

विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०२०-२०२१ इति शैक्षणिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं २७-१२-२०२० च ०२-०१-२०२१ दिनाङ्के अकारि। अस्यां प्रवेशपरीक्षायां ३१ शोधार्थिनः उत्तीर्णाः अभूवन्, येषां कृते विश्वविद्यालय-अनुदानायोगनियमानुगुणं षष्टिहोरात्मिका विद्यावारिधिकार्यशाला (P h . D . C o u r s e W o r k ) श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे ०८-०३-२०२१ तः २०-०३-२०२१ यावत् समायोजिता। अस्यां कार्यशालायां २९ शोधचिकीर्षवः उपस्थिताः आसन्। अत्र विशिष्टवक्तृरूपेण माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, वेदसङ्कायप्रमुखचरः प्रो. देवेन्द्रनाथपाण्डेयः, प्रो. विनोदकुमारझा, प्रो. अर्चनाकुमारीदुबे, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्डया, प्रो. महेन्द्रकुमारः दवे, अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, डॉ. शत्रुघ्नः पाणिग्राही, डॉ. पङ्कजकुमारः रावलः, डॉ. डी.एम्. मोकरिया, परीक्षानियामकः डॉ. योगेशकुमारः पटेलः, संशोधनाधिकारी डॉ. कार्तिकपण्ड्या च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। बाह्यविशिष्टवक्तृरूपेण नवदेहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रिय-संस्कृतविश्वविद्यालयस्य प्रो. पीयुषकान्तदीक्षितः तथा च प्रो. भागीरथीनन्दः, राजकोटस्थस्य सौराष्ट्रविश्वविद्यालययस्य प्रो. सी. के, कुम्भाराणा, कर्णावतीस्थस्य गुजरातविश्वविद्यालययस्य डॉ. अतुलः भट्टः, वटोदरस्थस्य महाराजासयाजीराव-विश्वविद्यालयस्य प्रो. रबीन्द्रकुमारः पण्डा, प्रो. मयंकः त्रिवेदी तथा च डॉ. श्वेताप्रजापतिः, बनारसहिन्दूविश्वविद्यालयस्य प्रो. रमाकान्तपाण्डेयः तथा च प्रो. विनयकुमारपाण्डेयः, केन्द्रियविश्वविद्यालयस्य एकलव्यपरिसरस्य डॉ. उत्तमसिंहः, कर्णावतीस्थस्य एल्. डी. प्राच्यविद्यासंस्थानस्य डॉ. धर्मेन्द्रभट्टः, एच्. के. विनयनमहाविद्यालयस्य डॉ. रवीन्द्रः खाण्डवाला च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। अस्याः कार्यशालायाः संयोजनं संशोधनाधिकारी डॉ. कार्तिकः पण्डया अकरोत् तथा च सहायकरूपेण हितेषजानी कार्यमकरोत्।



विद्यावारिधिकार्यशालायाः दृश्यम्



विद्यावारिधिकार्यशालायाः शोधार्थिनः

## अन्ताराष्ट्रियमहिलादिवसमुपलक्ष्य आयोजितः कार्य्यक्रमः

महिलाधिकारसमित्या अन्ताराष्ट्रियमहिलादिवसमुपलक्ष्य छात्राणां कृते ०८/०३/२०२१ तमे दिनाङ्के सोमवासरे मध्याह्ने द्वादशवादनतः सार्धैकवादनपर्य्यन्तं 'बेटी बचाओं, बेटी पढाओं'/ 'आत्मविश्वासी महिला' इति विषये चित्रकलाप्रतियोगिता समायोजितासीत्। अस्यां प्रतियोगितायाम् एकादश छात्राः भागं गृहीतवत्यः। अनन्तरं सायङ्काले सार्धचतुर्वादनतः एकः कार्य्यक्रमः आयोजितः। अस्मिन् कार्य्यक्रमे मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथः जादवः, अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, वेदविभागस्य आचार्यः प्रो. देवेन्द्रनाथपाण्डेयः, महिलाधिकारसमितेः अध्यक्षा प्रो. अर्चनाकुमारीदुबे, अन्याः अपि सदस्याः, छात्राश्च सम्मिलिताः आसन्। कार्य्यक्रमेऽस्मिन्नुपस्थितानां परिचयपुरस्सरं स्वागतं दर्शनविभागस्य सहायिकाचार्या डॉ. उमामहेश्वरी अकरोत्। ततः परं महिलाधिकारसमितेः अध्यक्षायाः प्रो. अर्चनाकुमारी-दुबे-वर्यायाः व्याख्यानम् अभवत्। उद्बोधनानन्तरमाचार्य्यद्वितीयवर्षस्य छात्रा सुश्रीकरुणा चौधरी स्वभावनां प्रकटितवती। तत्पश्चात् चित्रकलाप्रतियोगितायाः विजेत्र्यः छात्राः अनुस्नातकविभागाध्यक्षैः, प्राचार्य्यैश्च पुरस्कृताः। पूर्णतामन्त्रेण कार्य्यक्रमोऽयं सम्पन्नः। अस्य कार्य्यक्रमस्य सञ्चालनं व्याकरणविभागस्य सहायिकाचार्य्या डॉ. विदुषीबोल्ला अकार्षीत्।

चित्रकलाप्रतियोगितायाः पुरस्कारभाजः सन्ति -

1. प्रथमस्थानम् - मुलचन्दाणी पूनम
2. द्वितीयस्थानम् -गामीत श्रद्धा
3. तृतीयस्थानम् -गामीत हेतलकुमारी




अन्ताराष्ट्रियमहिलादिवसे कार्यक्रमस्य दृश्यम्




विजेतृभ्यः पुरस्कारप्रदानम्

## विद्यावारिधिशोधचर्चासमितिः (Research Discussion Committee of Ph.D.)



विद्यावारिधिशोधचर्चासमितिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०२०-२०२१ इति शैक्षणिकवर्षस्य कृते विद्यावारिधि-कार्यशालायाम् उपस्थितेभ्यः २९ शोधार्थिभ्यः विद्यावारिधिशोधचर्चासमितेः (Research Discussion Committee of Ph.D.) आयोजनं २२/२३-०३-२०२१ दिनाङ्कयोः परिसरे कृतम्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः विद्यावारिधि-शोधचर्चासमितेः आध्यक्षं निरवहत्। २२-०३-२०२१ दिनाङ्के क्रान्तिगुरुश्यामजीकृष्णवर्मा-कच्छविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. कश्यपः त्रिवेदी विषयनिष्णातरूपेण उपस्थितः आसीत्। २३-०३-२०२१ दिनाङ्के सौराष्ट्रविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वाचार्यः प्रो. राजेन्द्रचोटलिया विषयनिष्णातरूपेण उपस्थितः आसीत्। अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः तथा च प्रधानाचार्यः डॉ. नरेन्द्रकुमारः पण्डया उपस्थितौ आस्ताम्। विद्यावारिधिशोधचर्चासमितेः संयोजनं सभ्यसचिवरूपेण संशोधनाधिकारी डॉ. कार्तिकपण्डया अकरोत् तथा च सहायकरूपेण श्री हितेषजानी कार्यमकरोत्।



शिवस्य प्रतिमायाः स्वच्छतां कुर्वाणाः छात्राः



विवेकानन्दप्रतिमायाः स्वच्छतां कुर्वाणाः छात्राः

## वीरतादिवसमुपलक्ष्य स्वच्छताकार्यक्रमः

मार्चमासस्य २३ तमे दिनाङ्के वीरतादिवसः (शहीददिवसः) आचर्यते। एतं दिवसमुपलक्ष्य श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य राष्ट्रिय-सेवा-योजनायाः संयोजकः डॉ. जयेशकुमारः मुंगरा छात्रैः सह वेरावलनगरस्य महानुभावानां प्रतिमानां स्वच्छतायाः आयोजनं कृतवान्। छात्राः राष्ट्रधर्मस्य पालनं कुर्वाणाः स्वामिविवेकानन्दस्य भगतसिंहस्य अम्बेडकरमहोदयस्य शिवस्य च प्रतिमानां स्वच्छतां कृतवन्तः। अस्य कार्यक्रमस्य आयोजनं संयोजनं च डॉ. जयेशकुमारः मुंगरा अकरोत्।

## वृक्षाणाम् आकारप्रदानम्

राष्ट्रिय-सेवा-योजनायाः संयोजकः डॉ. जयेशकुमारः मुंगरा उद्यानपालकेन सह ३०/०३/२०२१ तमे दिनाङ्के विश्वविद्यालयस्य परिसरे वर्तमानानां वृक्षामाम् आकारप्रदानस्य कार्यम् अकरोत्। वृक्षाणां योग्यम् आकारं कृत्वा जलार्थम् मृत्तिकया आलवालनिर्माणमपि अक्रियत।



वृक्षाणाम् आकारप्रदानम् कुर्वन् डॉ. जयेशः मुंगरा उद्यानपालकः च



वृक्षेभ्यः सुन्दराकारप्रदानम्

## ज्योतिषविषयकः वेबिनारकार्यक्रमः




श्रीसोमनाथ-संस्कृत-विश्वविद्यालय IQAC, अनुस्नातकविभागः तथा विश्वविद्यालयद्वारा संचालित-संस्कृत-महाविद्यालयः इत्येतेषां संयुक्ततत्वावधाने ३१.०३.२०२१ तमे दिनाङ्के "वास्तुशास्त्रस्यालोके कक्षविन्यासः" इति समाजोपयोगी विषयमुपादाय ज्योतिषविषयक-वेबिनार इति कार्यक्रमः सत्रद्वयेनानुष्ठितः। कार्यक्रमस्य उद्घाटनसत्रे काशी-हिन्दु-विश्वविद्यालयस्य संस्कृत-विद्याधर्म-विज्ञान-सङ्कायस्य पूर्वाध्यक्षः प्रो॰ रामचन्द्रः पाण्डेयवर्यः मुख्यवक्तृत्वेन विशिष्टातिथित्वेन समुपस्थाय वास्तुशास्त्रदृष्ट्या गृहनिर्माणस्य कृते योग्यव्यवस्थाविषये सदसः मार्गदर्शनमकरोत्। सत्रेऽस्मिन् कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्ष्यम् ऊढवान्। वैदिकमङ्गलाचरणेन प्रारब्धे उद्घाटनसत्रेऽस्मिन् ज्योतिषविभागस्य सहायकाचार्यः नित्यानन्द ओझा मान्यवराणां स्वागतेन सहितं कार्यक्रमस्य प्रास्ताविकं प्रास्तौत्। प्रथमसत्रेऽस्मिन् डॉ. हेमु महेश राठोड महोदया, पन्नालाल व्यासः, कृष्णकुमार भार्गवः तथा च श्रीधरव्यासः स्वीयशोधपत्राणि पठितवन्तः। सत्रान्ते नित्यानन्द ओझा सर्वेषां महानुभावानां धन्यतां प्राकटयत्। अस्य प्रथमसत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्या अपूर्वा अग्रवाल अकार्षीत्। कार्यक्रमस्यास्य फेसबुकमाध्यमेन प्रत्यक्षप्रसारणमपि अभवत्।

ज्योतिषविषयक-वेबिनार इति कार्यक्रमस्य द्वितीयसत्रस्य आध्यक्ष्यं वेदवेदाङ्गसङ्कायस्य पूर्वाध्यक्षः प्रो. देवेन्द्रनाथ पाण्डेयवर्यः ऊढवान्। सत्रेऽस्मिन् षड्भिः शोधपत्रवाचकैः विविधाः प्रासंगिकविषयाः उपस्थापिताः। सम्पूर्णे वेबिनारे आहत्य दश शोधपत्राणि पठितानि। द्वितीयसत्रस्यान्ते अपूर्वा अग्रवाल-महोदयया सर्वेषां धन्यवादः आचरितः। पूर्णतामन्त्रेण कार्यक्रमस्य समापनं जातम्। सत्रस्यास्य सञ्चालनं नित्यानन्द ओझा अकरोत्। अस्य ज्योतिष-वेबिनार इति कार्यक्रमस्य मुख्यसंयोजकत्वं नित्यानन्द ओझा ऊढवान्, संयोजकत्वञ्च सुश्री अपूर्वा अग्रवाल च ऊढवती।

## स्वच्छताभियानकार्य्यक्रमः

महिलाधिकारसमित्या गणतन्त्रदिनमुपलक्ष्य २५-०१-२०२१ तमे दिनाङ्के सायं सार्धत्रिवादनतः स्वच्छताभियानकार्य्यक्रमः आयोजितः आसीत्। अस्मिन् कार्यक्रमे छात्राः अध्यापकाश्च उपस्थिताः आसन्।



स्वच्छताभियानकार्य्यक्रमस्य किञ्चन दृश्यम्



स्वच्छता कुर्वत्यः विश्वविद्यालयस्य महिलाप्राध्यापिकाः छात्र्यश्च

## शास्त्रि-शिक्षाशास्त्रि-पाठ्यक्रमस्य मान्यता प्राप्ता

श्रीसोमनाथसंस्कृतविश्वविद्यालये २०२१-२२ इति शैक्षणिकवर्षतः चतुर्वर्षात्मकस्य शास्त्रि-शिक्षाशास्त्रि इति संयुक्ताभ्यासक्रमस्य (B.A. B.ED. Integrated Course) आरम्भः भविष्यति। तदर्थं NCTE द्वारा मान्यता प्रदत्ता अस्ति।



Jayhind 09-01-2021 p.8

### સોમનાથ સંસ્કૃત યુનિ.માં હવે બી.એ. બી.એડ. થઈ શકશે

#### આગામી શૈક્ષણિક વર્ષથી ૧૨ પાસ કરનાર છાત્રોને લાભ

(પ્રતિનિધિ દ્વારા)

વેરાવળ તા.૮

વેરાવળમાં આવેલી સોમનાથ સંસ્કૃ-ત યુનિવર્સિટીમાં નવી બી.એ.બી.એડ. કોલેજની મંજૂરી મળતા હવે સંસ્કૃતમાં પણ બી.એડ. થનાર છે વેરાવળમાં આવેલ સોમનાથ સંસ્કૃત યુનિવર્સિટી ને એન.સી.ટી.ઇ. દ્વારા ઇનોવેટીવ એન્ડ ઇન્ટગ્રેટેડ (સમન્વિત) ચાર વર્ષના બી.ઇ.ડી. ના અભ્યાસ ક્રમની માન્યતા મળેલ છે. સંસ્કૃત યુનિ. માં હવે ગ્રાન્ટેડ ફી ના ધારાધોરણ મુજબ વિદ્યાર્થીઓને બી.એડ. કરવાની તક ઉપલબ્ધ થશે જેથી વિદ્યાર્થીનું એક વર્ષ બચી જશે અને ધોરણ-૧૨ પછી સોમનાથ સંસ્કૃત યુનિવર્સિટીમાં ચાર વર્ષમાં સ્નાતક અને શિક્ષણ સ્નાતકની એમ બે પદવી એકી સાથે મેળવી શકાશે. આગામી શૈક્ષણિક વર્ષથી ૧૨ મું ધોરણ પાસ કરનાર વિદ્યાર્થીઓ આનો લાભ લઇ શકશે. સોમનાથ સંસ્કૃત યુનિવર્સિટી સમાજને સંસ્કૃત વિષયના ઉત્તમ પ્રશિક્ષિત સંસ્કૃત શિક્ષકોની ભેટ આપશે. આ ઉપલબ્ધિ માટે યુનિવર્સિટીના કુલપતિ પ્રો.ગોપબંધુ મિશ્ર અને કુલસચિવ ડો.દશરથ જાદવે વિશેષ જહેમત ઉઠાવી હતી.

સોમનાથ સંસ્કૃત યુનિવર્સિટીમાં ગાંધીનગર સ્થિત ગુજરાત નેશનલ લો યુનિવર્સિટી સાથે તા.૦૬-૦૧-૨૦૨૧ ના રોજ શૈક્ષણિક-કરાર/ એમ.ઓ.યુ. કર્યાં છે જે આ યુનિવર્સિટીની શૈક્ષણિક પ્રગતિઓ પૈકીનું એક સોપાન છે. યુનિવર્સિટીએ અત્યાર સુધીમાં કુલ ૧૯ સંસ્થાઓ/ યુનિવર્સિટીઓ સાથે શૈક્ષણિક-કરાર/ એમ.ઓ.યુ. કર્યાં છે જેમાં વિદેશની સંસ્થાઓ/યુનિવર્સિટીઓ સાથે થયેલ શૈક્ષણિક -કરાર/એમ.ઓ.યુ. ની સંખ્યા પાંચ હોવાનું એક યાદીમાં જણાવેલ છે.

२०२१-२२ वर्षतः शिक्षाशास्त्रि अभ्यासक्रमस्य आरम्भः

## संस्कृतप्रचारप्रसाराय गुजरातराज्यस्य प्रतिजनपदं मानितप्रतिनिधीनां नियुक्ति

अथ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रचारप्रसाराय गुजरातराज्यस्य प्रतिजनपदं 'मानितप्रतिनिधिः' (Brand Ambassador) इत्येतेषां नियुक्तिः माननीयकुलपतिवर्याणां निर्देशानुसारं कृता। एते नियुक्ताः महानुभावाः स्वस्य जनपदे विश्वविद्यालयस्य प्रचारप्रसारे सहकारं कुर्वन्ति।

| क्रमः | जनपदम् | नाम | क्रमः | जनपदम् | नाम |
|---|---|---|---|---|---|
| १ | कर्णावती | श्रीधर व्यास | १८ | महिसागरम् | श्री अल्पेशकुमार पटेल |
| २ | अमरेली | डॉ.अमित उपाध्याय | १९ | महेसाणा | श्री विजय विनुभाई पटेल |
| ३ | आणन्द | डॉ. वसन्त पटेल | २० | मोरबी | श्री मयूर शुक्ला |
| ४ | अरवल्ली | श्री पीयूष पटेल | २१ | नर्मदा | प्रो. प्रकाशचन्द्र जोषी |
| ५ | बनासकांठा | श्री किशोरभाई दवे | २२ | नवसारी | श्री नयनाबेन नायक |
| ६ | भरुच | डॉ. दीपक पारेख | २३ | पंचमहाल | श्री मुकेशकुमार एस. महेरा |
| ७ | भावनगरम् | श्री प्रणव राज्यगुरु | २४ | पाटण | श्री अजितकुमार एम. भालैया |
| ८ | बोटाद | श्री मनोजकुमार उपाध्याय | २५ | पोरबंदरम् | डॉ. सागर बाम्भणिया |
| ९ | छोटा उदेपुरम् | श्री तेजलबेन राणा | २६ | राजकोट | श्री विठ्ठलभाई वागडीया |
| १० | दाहोद | श्री धर्मेन्द्र जोषी | २७ | साबरकांठा | श्री वसिष्ठ व्यासः |
| ११ | डांग | श्री भगिनाबेन | २८ | सुरत | डॉ.भरत व्यास |
| १२ | देवभूमि द्वारका | श्री उत्तम शुक्ल | २९ | सुरेन्द्रनगरम् | डॉ.भरत कणझारिया |
| १३ | गांधीनगरम् | डॉ. माधवी उपाध्याय | ३० | तापी | प्रो.महेशभाई बारे |
| १४ | गीर सोमनाथ | डॉ. मानसिंह केशोदा | ३१ | वडोदरा | श्री हसमुख जादव |
| १५ | जामनगरम् | डॉ. कोमल भट्ट | ३२ | वलसाड | डॉ.हंसाबेन परमार |
| १६ | जुनागढ | डॉ.विनु वाजा | ३३ | कच्छ | डॉ.पंकज ठाकर |
| १७ | खेडा | श्री पारस दवे | | | |

## श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नियमनिर्धारणाय समितेः उपवेशनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नियमानां निर्धारणाय महानुभावानां समितेः उपवेशनम् जनवरीमासस्य २३ तः २५ दिनाङ्केषु आयोजितम्। अत्र विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः अध्यक्षत्वेन, कुलसचिवः डॉ. दशरथः जादवः अन्ये च महानुभावाः समितिसदस्याः उपस्थिताः आसन्।




विश्वविद्यालयस्य नियमानां निर्धारणाय महानुभावानां समितेः उपवेशनम्



विश्वविद्यालयस्य नियमानां निर्धारणाय महानुभावानां समितिः

## कुलपतेः मेलनम्



३१-०१-२०२१ तमे दिनाङ्के द्वारिकायां द्वारिकाधीश-संस्कृत-अकादम्याः निदेशकेन राष्ट्रपति-पुरस्कृतेन जयप्रकाशद्विवेदिमहोदयेन सह माननीयकुलपतेः प्रो. गोपबन्धुमिश्रस्य सपत्नीकं मेलनं जातम्। अस्मिन् अवसरे निदेशकवर्यः माननीयकुलपतेः तत्पत्न्याश्च स्वागतम् अभिवादनं च अकरोत्।



श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रवासिनां मार्गदर्शनस्य अभ्यासक्रमस्य कृते २६-०१-२०२१ तमे दिनाङ्के सोमनाथन्यासस्य अधिकारिभिः सह चर्चासत्रम् आयोजितम्। अत्र माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथः जादवः, न्यासस्य अधिकारी श्री पी. के. लहेरी, श्रीविजयः चावडा च उपस्थिताः आसन्।

१२-०१-२०२१ तमे दिनाङ्के प्रसिद्धः कथावाचकः डॉ. महोदेवप्रसादः महेता श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयेन कुलपतिमहोदयेन सह मेलितुम् समागतः। अस्मिन् अवसरे माननीयकुलपतिमहोदयेन कुलसचिवेन च महादेवप्रसादमहोदयस्य अभिवादनम् अक्रियत।







१२-०१-२०२१ तमे दिनाङ्के गुजरातराज्यस्य संस्कृतबोर्ड इत्यस्य अध्यक्षः श्रीजयशंकरभाई रावलः श्रीसोमनाथसंस्कृतविश्वविद्यालये समागतः। माननीयः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रः तथा कुलसचिवः डॉ. दशरथः जादवः स्मृतिचिह्नप्रदानेन उपवस्त्रेण च श्रीजयशंकरमहोदयस्य अभिवादनं स्वागतं च अकुरुताम्।

२६-०३-२०२१ तमे दिनाङ्के वेरावल-पाटण-संयुक्तनगरपालिकायाः प्रमुखेन उपप्रमुखेन च सह श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः डॉ. दशरथः जादवः, अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, डॉ. दीपेशः कतिरा च अमिलन्। प्रमुखस्य उपप्रमुखस्य च स्मृतिचिह्नप्रदानेन विश्वविद्यालयपक्षतः अभिवादनम् अभवत्।



## प्राध्यापकानाम् उपलब्धयः गतिविधयश्च

**डॉ. ललितकुमार पटेलः**

- शास्त्रपरिचायिका इति ग्रन्थे लेखकत्वेन कार्यम्। (E-book in PDF) जान्युआरी, २०२१, ISBN – ९७८-९३-८३०९७-४४-९
- शास्त्रपरिचायिका इति ग्रन्थे लेखकत्वेन कार्यम्। (ग्रन्थरूपेण), फ़ेब्रुआरी, २०२१, ISBN - ९७८-९३-८३०९७-४५-६
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यावारिधिकार्यशालायाम् "अनुसन्धानार्थाः, परिभाषाः, पर्यायशब्दाश्च"इति विषये व्याख्यानप्रदानम्। (०८-०३-२०२१)
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यावारिधिकार्यशालायाम् "काव्यसाहित्यिकालोचनात्मकं प्रकाशनम्"इति विषये व्याख्यानप्रदानम्। (१०-०३-२०२१)
- भावनगरविश्वविद्यालये विद्यावारिधिकार्यशालायां "रामायण अने तेनी समीक्षित आवृत्ति" इति विषये व्याख्यानप्रदानम्। (जनवरी २०२१)
- भावनगरजनपदसम्मेलने मुख्यवक्तृत्वेन उपस्थितिः। (२५-०१-२०२१)
- राष्ट्रिय-एकता-प्रतिमायाः (स्टेच्यू ओफ यूनिटी) मार्गदर्शकानां प्रशिक्षकत्वेन कार्यम्। (२२,२३-०१-२०२१)

**डॉ. जानकीशरण आचार्यः**

- ०३-०४.०१.२०२१ - अद्वैत एकेडमी इति फेसबुक-आमुखपटले "प्रस्थानत्रयीविमर्शः" इति विषये व्याख्यानद्वयं प्रदत्तम्।
- ०५.०१.२०२१ - श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य UGC NET-JRF/SET इति प्रशिक्षणवर्गे आमन्त्रितव्याख्यानं प्रदत्तम्।
- "शास्त्रपरिचायिका" इति सर्वशास्त्रविषयकपुस्तकस्य सम्पादनं विहितं तथा च तत्र "सर्वदर्शनम्" इति पाठ्यांशस्य लेखनमपि अकारि।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "सोमज्योतिः" (संयुक्ताङ्कः - २३-२४) इति वार्तापत्रस्य सम्पादनम् अकारि।
- ०८.०१.२०२१ - विश्वविद्यालये NAAC-विषये मार्गदर्शनार्थम् आयोजिते छात्राणाम् अभिविन्यासकार्यक्रमस्य संयोजनं कृतम्।
- १७.०२.२०२० - दर्शनविभागेन समायोजतस्य ओनलाइन दर्शनवेबिनारकार्यक्रमस्य संयोजनं विहितम्, अपि च तत्र शोधपत्रवाचनं सत्रसञ्चालनम् अपि कृतम्।
- २०२०-२१ तमे शैक्षणिकवर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वाग्वर्धिनीपरिषदः सभ्यसचिवरूपेण सञ्चालनं विहितम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयपक्षतः गुजरातसर्वकारस्य SSIP इति योजनायाः समन्वयकरूपेण कार्यं कृतम्।

**डॉ. कार्तिक पण्ड्या**

- गुजरातसर्वकारस्य SHODH (2020-21) कृते विश्वविद्यालयस्य संयोजकरूपेणकार्यं व्यधामयि।
- Gujarat State Institutional Rating Framework 2020-21 (KCG) कृते विश्वविद्यालयस्य संयोजकरूपेण कार्यं व्यधायि।
- NAAC कृते विश्वविद्यालयस्य सहसंयोजकरूपेण कार्यं व्यधायि।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा समायोजिते UGC-NET/JRF/SET प्रशिक्षणकेन्द्रे अधोलिखितानि व्याख्यानानि प्रदत्तानि –
  - 'Research Aptitude' (१०-०२-२०२१), o 'Research Methods and Methodology' (१२-०२-२०२१)
  - 'Teaching Aptitude' (१८-०२-२०२१) o 'Methods of Teaching' (२३-०२-२०२१)
- श्रीसोमनाथसंस्कृतविश्वविद्यालय-वेरावलद्वारासमायोजितायां विद्यावारिधिकार्यशालायाम् अधोलिखितानि व्याख्यानानि प्रदत्तानि -
  - 'Ph.D. Regulations of SSSU, Veraval' (१०-०३-२०२१)
  - 'Publication Ethics: Definition, Introduction and Importance (In the light of Ph.D. Regulations of SSSU, Veraval)' (१२-०३-२०२१)
  - 'Publication Misconduct: Definition, Concept, Problem that lead to unethical behavior and vice-versa, Types' (१३-०३-२०२१)
  - 'शोधपरिसरः तथा च उत्तमसंशोधकस्य लक्षणानि' (१४-०३-२०२१)

**श्रीजिगर भट्टः**

- शास्त्रपरिचायिका इति ग्रन्थे लेखकत्वेन कार्यम्। (E-book in PDF) जान्युआरी, २०२१, ISBN – ९७८-९३-८३०९७-४४-९
- शास्त्रपरिचायिका इति ग्रन्थे लेखकत्वेन कार्यम्। (ग्रन्थरूपेण), फ़ेब्रुआरी, २०२१, ISBN - ९७८-९३-८३०९७-४५-६
- CCC+ परीक्षायाम् उत्तीर्णतां प्रापत्। (मार्च् २०२१)
- १८-१९/०२/२०२१ दिनाङ्कयोः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य आभासीय-युवमहोत्सवस्य संयोजकत्वेन कार्यम् अकरोत्।



श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दलेन द्वितीयं स्थानं प्राप्तम्

## कबड्डीप्रतियोगिता

वेरावल-कबड्डी-क्रीडकदलद्वारा ०७-०३-२०२१तमे दिनाङ्के "मोदी ग्राउण्ड" सोमनाथे जनपदस्तरीया कबड्डीप्रतियोगिता आयोजिता।अस्यां प्रतियोगितायां पञ्चदशदलैः भागः गृहीतः। तत्रश्रीसोमनाथसंस्कृतविश्वविद्यालयेन द्वितीयं स्थानं प्राप्तम्। स्पर्धायां BEST RAIDER सम्माननं विश्वविद्यालयच्छात्रः राजगोर जयदीपः लब्धवान्। विश्वविद्यालयस्य दलप्रमुखरूपेण त्रिपाठी ऋषिः कार्यमकरोत्। विश्वविद्यालयदलस्य विजेतृभ्यः क्रीडकेभ्यः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः तथा अध्यापकाः अभिनन्दनानि पाठितवन्तः। अस्य दलस्य मार्गदर्शनं डॉ. जयेशकुमारः मुंगरा अकरोत् अतः तस्मै अपि अभिनन्दनानि प्रदत्तानि।



सरदार वल्लभभाई पटेल वक्तृत्वस्पर्धायाः एकं चित्रम्

## हिन्दीदिवसम् उपलक्ष्य वक्तृत्वस्पर्धा समयोजिता

सरदार वल्लभभाई पटेल वक्तृत्वस्पर्धा एवं जेठालाल जोशी हिंदीवक्तृत्वस्पर्धा ऑनलाइन आयोजिता आसीत्। अस्यां वक्तृत्वस्पर्धायां श्रीसोमनाथ-संस्कृतविश्व-विद्यालयस्य आचार्यप्रथमवर्षस्य साहित्यविभागल्य छात्रा मकवाणा सीमा राजेशभाई द्वितीयं स्थानं प्राप्तवती। तदर्थं माननीयः कुलपतिवर्यः, कुलसचिववर्यः, अध्यापकाश्च अस्यै छात्रायै अभिनन्दनानि प्रदत्तवन्तः। पुरस्कारं प्राप्तवद्भ्यः सर्वेभ्यः छात्रेभ्यः विश्वविद्यालयपक्षतः हार्द्याः शुभकामनाः प्रदीयन्ते।


# श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः

राजेन्द्रभुवनमार्गः, वेरावलम्-३६२ २६६, गीरसोमनाथ-जनपदः (गुजरातम्)

दूरभाषः ०२८७६-२४४५२८/२९/३२ फेक्स – २४४४१७, वेबसाइट www.sssu.ac.in Email: sssu.veraval@gmail.com

## प्रवेश-सूचना २०२१-२२

शुल्क-विवरणम् (प्रतिसत्रम्)

| क्रमः | अभ्यासक्रमाः | विषयाः | न्यूनतम-योग्यता | अवधिः | शुल्कम् * (Boys) | शुल्कम् * (Girls) |
|---|---|---|---|---|---|---|
| १ | आचार्यः (M.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | संस्कृतमुख्यविषयेण सह स्नातकोपाधिः | 2 Years | 1250 | 550 |
| २ | M.A. | योगः | स्नातकोपाधिः | 2 Years | 2100 | 2100 |
| | | संस्कृतम् (General Studies) | स्नातकोपाधिः | 2 Years | 1250 | 550 |
| ३ | संयुक्त-शास्त्रि-शिक्षाशास्त्री (Integrated B.A., B.Ed.) | संस्कृतम् | १२तमा कक्षा (50% सह) | 4 Years | 8050 | 5550 |
| ४ | शास्त्री (B.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | १२तमा कक्षा | 3 Years | 1250 | 650 |
| ५ | पदविका (Diploma) | योगः, ज्योतिषम्, कर्मकाण्डम्, संस्कृतशिक्षणम्, मन्दिरव्यवस्थापनम् | १२तमा कक्षा | 1 Years | 500 | 500 |

* अत्र निर्दिष्टं शुल्कं केवलम् एकस्य सत्रस्य अस्ति। * एतत् मुख्यकेन्द्रे स्वीक्रियमाणं शुल्कम् अस्ति।
* प्रतिसत्रं परीक्षाशुल्कं तथा च छात्रावासशुल्कम् एतत् अतिरिक्तं भवति।

### प्रवेशाय सम्पर्कं कुर्वन्तु-

- **डॉ. नरेन्द्रकुमार पण्ड्या**, प्रधानाचार्यः, ९८९८५४०४०३
- **डॉ. पङ्कजकुमार रावलः**, अध्यापकः, ९८७९३२९८९८
- **श्री जयदीपसिंह परमार**, जु. क्लर्क, ७३५९५१७४००
- **डॉ. ललितकुमार पटेलः**, अध्यक्षः, ९८७९८३४०७१
- **डॉ. दीपेश कतिरा**, अध्यापकः, ९५९४३५६८५७
- **श्री करसन छात्रोडिया**, जु. क्लर्क, ९८२४९६६०२२



कार्यालयः – ०२८७६-२४४५३२/३३ Web: www.sssu.ac.in Email: sssu.veraval@gmail.com